[29],[119]स संकेतयन्त्रितो[119] वश्यो[120] रसज्ञः शल्लकीभुवाम्[121] ।
संतप्तलोहकवलं गृह्णाति[122] विनये स्थितः ॥ ५१ ॥

एष कामरसाकृष्टः कष्टां[123] विकृतिमाययौ ।
पुनः प्रकृतिमापन्नः[124] प्रशान्तमदनज्वरः ॥ ५२ ॥

---

106 With B, प्रास्या° AD. 107 With B, °णी AD. 108 With B, °स्मर AD. 109 With B, °रभ्ये AD. 110 D inserts क्ष्मं after सप्तभिः. 111 संसक्तस् em., cf. T, °सिवक्तस्° AD, °संबद्धस्° em. B. Editor notes °सिलक्तस्° as the original text reading in B. तस्थौ with em. B, °तस्थो AD.
112 Em., cf. T which suggests. *कबलाभिलाषः (metrically and grammatically unsatisfactory), कचललावः A, भुक्त्वा यथासुखम् em. B, कचललापः D. Editor notes कचललापः as the original text reading in B. 113 With B, °यन्त्रितः AD. 114 With B, cf. T, स्वययायतं A, स्वयमायतं D. 115 With B, °यात AD. 116 With B, °कर्षहर्षादराजे A, °कर्षाहर्षादराजे D. 117 With B, °गवगु° A, °गपगु° D. 118 With B, cf. T, °रात्तरः AD. 119 *Pāda* a has one syllable extra. संकेत° s.em. with B, m.c., cf. T. त्रितो with B, °त्रितं AD. 120 With B, वश्य AD. 121 With B, सल्ल° ACD. 122 With B, °णति AD. 123 With B, °टा AD. 124 °वन्नः D.

[27] A(6a). [28] °संय° D(6b). [29] B(17).

शक्या दमयितुं देव सिंहव्याघ्रगजादयः ।
न तु रागासवक्षीवविषयाभिमुखं[125] मनः ॥ ५३ ॥

एतदाकर्ण्य भूपालस्तत्तथेति विचिन्तयन् ।
उवाच सत्यमुचितं संयात कथितं [30]त्वया ॥ ५४ ॥

[31]अप्यस्ति[32] कश्चिल्लोके ऽस्मिन् येन चित्तमदद्विपः ।
नीतः प्रशमशीलेन संयमालीनताम्[126] ॥ ५५ ॥

इत्युक्ते देवताविष्टः संयातस्तमभाषत[127] ।
देव सन्ति जगत्क्लेशनिःशेषोन्मूलनोद्यताः[128] ॥ ५६ ॥

विवेककलिता[129] लोके वैराग्यजनिताग्रहाः[130] ।
शमसंतोषविशदा[131] बुद्धा[132] एव प्रबोधिनः ॥ ५७ ॥

इति बुद्धाभिधां[133] श्रुत्वा सम्यक्संबोधिचेतसः ।
राज्ञः[134] प्राग्जन्मजाभ्यासात्प्रणिधानमजायत[135] ॥ ५८ ॥

[33]विनिमज्जज्जगदिदं संसारे मकराकरे ।
संतारयेयं संबोधिमुक्तः कुशलसेतुना[136] ॥ ५९ ॥

---

125 With em. B, °क्षविवि° A, °क्षविपि° D. 126 लीन with B, °लिन° AD. *Pāda* d has two syllables missing. संयमालानलीनताम् s.em. with B, m.c., cf. T. 127 With B, °षतः AD. 128 With B, °निशेषोन्मूल° A, °निशेषोन्म्वुल° D. 129 Em., cf. T, °ककालता AD, °कालोकिता B. 130 With B, cf. T, °राग्यलिताग्र° AD. 131 With s.a. B and em. C, °षदा ABD. 132 With B, बुद्ध AD. 133 पुद्धा° D. 134 With B, राज्ञाः AD. 135 °जम्मजा° D. °सप्रणिधा° B. 136 With B, कुलशल° AD.

[30] A(6b). [31] C(11). [32] अ° D(7a). [33] B(19).

अथोचुर्देवता[137] व्योम्नस्तं शुद्धावासकायिकाः ।
सम्यक्संबोधिसंबुद्धो[34] भविष्यसि महीपते[138] ॥ ६० ॥

इति तद्वचनं[139] श्रुत्वा राजा [35]विरजसां[140] वरः[141] ।
जातिस्मरो दिव्यचक्षुः[142] प्रययौ बोधिसत्त्वताम्[143] ॥ ६१ ॥

अथ स विपुलसत्त्वस्तत्त्वनिक्षिप्तचक्षुर्
भवजलनिधिमज्जत्सर्वभूतानुकम्पी ।
अभवदभिनवोद्यत्संविदुत्साहयोगात्[144]
कलितकुशलसेतुः[145] सत्त्वसंतारणाय ॥ ६२ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां प्रभासावदानं[146]
[147]-पल्लवः प्रथमः-[147] समाप्तः ॥

---

137 With B, सथोचुर्देवत AD. 138 महामते B. 139 With B, तद्वचन A, तद्पचन D. 140 With B, °सं AD. 141 With B, रवः AD. 142 °चक्षः A. 143 With B, °ता AD. 144 अभवदब्ज्ञन° D. 145 दलित° C. सेतुः with B, °सेतू AD. 146 °वरानं D. 147 नाम प्रथमः पल्लवः B.

[34] °बोधि° D(7b). [35] A(7a).

[1][२. श्रीसेनावदानम्][1]

ते जयन्ति जगत्यस्मिन् पुण्यचन्दनपादपाः ।
छेदनिर्घर्षदाहे ऽपि ये परार्थेषु निर्व्यथाः ॥ १ ॥

गणनीया[2] गुणगणैरस्त्यरिष्टाभिधा[3] पुरिः[4] ।
[2]स्पर्धया शक्रनगरी यस्या [5]-सा न गरीयसी-[5] ॥ २ ॥

तस्यां बभूव भूपालः[6] श्रीसेन इति विश्रुतः[3] ।
समग्रगुणरत्नानां रत्नाकर इवाकरः ॥ ३ ॥

परोपकारसक्तस्य[7] बभुर्यस्य[8] प्रभावतः ।
अनुरक्ता दिशः सर्वाः सूर्यस्येव[9] प्रभावतः ॥ ४ ॥

यशोभिः[10] शोभितं येन घनदानसुगन्धिभिः[11] ।
गजैश्च भूतिधवलैर्जगत्कल्पद्रुमैरिव ॥ ५ ॥

कलालयो ऽपि सरलः[12] सरलो[13] ऽपि महामतिः ।
बभूव[14] प्रजापुण्यैर्मतिमानप्यवञ्चकः[15] ॥ ६ ॥

---

1 B starts द्वितीयः पल्लवः । श्रीसेनावदानम् । C starts २ श्रीसेनावदानम् । 2 With B, °नीय AD. 3 With B, °गनैर° AD. 4 पुरी C. 5 Sc. er., न सा न गरीयसी AD, न स्याद्गरीयसी B. 6 With B, °पाल AD. 7 °शक्त° B. 8 Em., cf. T, चतुर्यस्य AD, चतुरस्य em. B. 9 With B, °यव AD. 10 भीः D. 11 धन° C. 12 With C, शरलः ABD. 13 With C, शरलो ABD. 14 बभूव with B which reads स बभूव. The text reading has one syllable missing. यो बभूव s.em. with s.a. B and em. C, cf. T. 15 With B, °ममतिमा° AD.

[1] B(21); C(12). [2] D(8a). [3] विश्रु° A(7b).

[4]यावत्तपति तिग्मांशुर्यावद्वहति मारुत:[16] ।
तावदाज्ञा[17] च कीर्तिश्च यस्याप्रतिहताभवत् ॥ ७ ॥

शमव्यायामविदुषां[18] षड्गुणज्ञानचक्षुषाम्[5],[19] ।
यं द्वादशसहस्राणि मन्त्रिणां[20] पर्युपासते[21] ॥ ८ ॥

तस्मिन् धर्मपुरे[22] राज्ञि बभूव सुकृती जन: ।
भर्तृतुल्या भवन्त्येव[6] गुणै: स्त्रिय इव प्रजा: ॥ ९ ॥

तस्य पुण्याधिवासेन[23] जनास्त्रिदिवगामिन: ।
विमानै: शक्रनगरीं[24] नि:संचारां[25] प्रचक्रिरे ॥ १० ॥

दृष्ट्वा[26] मनुजलोकेन सुरलोकसमावृतिम्[27] ।
जातवैर: क्षितिपतौ शतक्रतुरचिन्तयत्[28] ॥ ११ ॥

---

16 With B, मरु° AD. 17 With B, तव° AD. 18 With C, सम° ABD. 19 With B, °षं AD. 20 With B, °त्रीणां AD. 21 With B, प्रर्यु° AD. 22 °परे s.a. B and em. C. 23 With em. B, °पुण्यापि° AD. 24 With B, °गरी AD. 25 Em., °री: ABD. 26 With B, दृष्टा AD. 27 With B, °वृतृ A, वृत्ति D. 28 With B, °चिन्त्र° AD.

[4] B(23). [5] °ज्ञा° D(8b). [6] °ये° A(8a).

[29]-[अत्यर्थं दीयते दानमहो श्रीसेनभूभुजा ।
तेन कल्याणशीलेन प्रजाश्चात्मसमाः कृताः]-[29] ॥ १२ ॥

[7],[30]-[तस्याखण्डितचित्तस्य दानसत्त्वबलीयसः]-[30] ।
कर्तव्या धैर्यजिज्ञासा मया मायाविधायिना[31] ॥ १३ ॥

---

29 Tentative reconstruction in Anuṣṭubh on the basis of T. The original Sanskrit verse was lost. AD remark, cf. also B, p. 22: *kye*[1] *ma sa spyod dpal gyi sdes sogs kyi shlo*[2] *ka gcig po 'di'i*[3] *rgya skad ma dpe tshor chad pa dbang po rdo rje'i sdeb sbyor du*[4] *za hor gyi bandes bsgrigs*[5] *pa slar rgya dpe rnyed na dpyad*[6]. 1 *kya* A. 2 *sho lo* AB. 3 *'di 'i* B. 4 *ru* B. 5 *bsgregs* AB. 6 *'byar* B. [The Buddhist monk of Za-hor arranged this one verse, *kye ma sa spyod dpal gyi sdes*, etc., missing in the original Sanskrit manuscripts, in Indravajrā meter. If a Sanskrit manuscript is obtained later, compare (them).] B remarks: "The Bande (Buddhist Pandit) seems to have translated the Tibetan version of the śloka word for word into Sanskrit. Reversing the order of that version we have: Sde dpal-gyi Sa-spyod kyema, &c., the Sanskrit equivalent of which, word for word is - सेनेन लक्ष्मी वसुधेषु चारस्याश्चर्य्य &c." The verse, supposedly recomposed by the Buddhist pandit of Za-hor, is corrupt. It reads in AD: सेनेन मक्ष्मी[1] वसुधेषु चारस्याश्चार्यकार्ताव्य[2] च दत्तनित्यम् । कल्यण्यशीलेन[3] च सर्वचेत न्यप्रव्युहासामन अस्मकश्च ॥ 1 ष् in •क्ष• illegible in A. 2 च in चार• illegible in A. 3 ए in •लेन illegible in A. B has emended this verse to: सेनेन लक्ष्मी वसुधेषु चारस्याश्चर्य्यकर्त्तव्य च दत्तनित्यम् । कल्याणशीलेन च सर्व्वचेतन्यप्रव्यहासामन अस्मकाश्च ॥ 30 Tentative reconstruction in Anuṣṭubh on the basis of T. The original Sanskrit line was lost. AD remark, cf. also B, p. 24: *spyin pa'i snying stobs mthu ldan zhing zhes*[1] *pa'i tshig rkang gcig po 'di'i skad dod mi 'dug pa rkang pa gzhan rnams dang mthun par kha*[2] *sgo yang*[3] *ma'i sdeb sbyor*[4] *ru*[5] *'dar los bkod brgya*[6] *dpe rnyed na dpyad*[7]. 1 *shes* B. 2 *la* B. 3 *yangs* D. 4 *b* and *by* illegible in A. *spor* B. 5 *ngu* D. 6 *pa rgya* B. 7 *'byar* B. [The (Sanskrit) original of this one *pāda*, "*spyin pa'i snying stobs mthu ldan zhing*," does not exist. 'Dar-lo composed (this) in Anuṣṭubh meter in conformity with the other *pādas*. If a Sanskrit manuscript is found, compare (them).] The line supposedly composed by 'Darlo is corrupt. It reads in AD: तस्याः खण्डीतचेतासः दद्धद्वल्तनुभावावां[1] । 1 दद्धद्वल्यानुभापापां D. B reads: तस्याखण्डितचेतसः दद्धिद्वल्यानुभावपाम् । 31 With B, cf. T, •भिधायिनां AD.

[7] B(25).

[8]इति संचिन्त्य[32] सुचिरं स्वल्पैरनुगतः[33] सुरैः[9] ।
रूपं शक्रः परावर्त्य[34] मर्त्यलोकमवातरत्[35] ॥ १४ ॥

अत्रान्तरे[36] प्रजाकार्यपर्यालोचनतत्परः ।
राज्यरक्षागुरुर्मन्त्री[37] नृपमूचे[38] महामतिः ॥ १५ ॥

[10]राजन् विरजसा राज्यराजमानेन निर्जितः ।
निर्व्याजदानैर्भवता लज्जते[39] त्रिदशेश्वरः ॥ १६ ॥

परस्य पूर्णगुणतामात्मनस्तद्विहीनताम् ।
दृष्ट्वा को नाम नायाति मात्सर्यस्य विधेयताम्[40] ॥ १७ ॥

ईर्ष्यालवः[41] [42]-परोत्कर्षे संघर्षोष्णजुषो-[42] जनाः ।
प्रायेणोद्वेगमायान्ति[43] महतां[44] सुकृतेष्वपि[45] ॥ १८ ॥

[46]-सर्वस्वदानं मर्यादा दानव्यसनिनो-[46] ऽस्तु[47] ते ।
पुत्रदारात्मदाने[48] तु संकल्पोऽप्यतिसाहसः[49] ॥ १९ ॥

[11]दृश्यन्ते[50] दारुणास्ते ते [12]स्वप्नाः[51] साध्वसहेतवः[52] ।
जगतः सूच्यते तीव्रं यैश्चूडामणिखण्डनम्[53] ॥ २० ॥

---

32 With B, °चित्य AD. 33 With B, स्वपैर° AD, सर्वैर° C. 34 With s.a. B and em. C, °वृत्य ABD. 35 °मपातरत D. 36 With B, °त्रन्त° AD. 37 With B, °रुमन्त्रि AD. 38 With em. B, °मूढ AD. 39 With s.a. B and em. C, °ज्जति ABD. 40 With s.a. B and em. C, विधीय° ABD. 41 °लपः D. 42 Em., cf. T, °कर्षसंघर्षोष्यजुषो AD, °कर्षसंघर्षस्य युषो B, °कर्षसंघर्षस्य जुषो C. 43 With B, °येणोर्वे° AD. 44 With B, महातां AD. 45 °कृतषपि A. 46 दानं em., °दान° ABD. व्यसनि with B, °व्यपनि° AD. °दानमर्यादादा° B. 47 With B, स्तू AD. 48 With B, °दानि AD. 49 Sc. er., cf. T, स्यति° AD, ह्यति° B. 50 With B, °शन्ते AD. 51 With B, स्वस्नाः AD. 52 With B, cf. T, साघस° AD. 53 With B, येश्चूडमनिखण्डना A, ये श्चूडमणिखण्डना D.

[8] C(13). [9] सु° D(9a). [10] A(8b). [11]B(27). [12] D(9b).

दैवज्ञानां[54] प्रवादश्च श्रूयते तत्त्ववादिनाम्[55] ।
शरीरं[56] पृथिवीपालो दास्यतीति सुदुःसहः ॥ २१ ॥

शरीरदानं सर्वार्थिसार्थनैष्फल्यकारणम्[13] ।
सर्वप्रदो[57] [58]-भवत्येव तिष्ठन्-[58] कल्पमहीरुहः ॥ २२ ॥

तस्मादस्मान्महीपाल विरम त्यागसाहसात् ।
रक्षारत्नं हि जगतः प्रजायत्तं वपुस्तव ॥ २३ ॥

इति मन्त्रिवरेणोक्तमाकर्ण्य[59] वसुधाधिपः ।
तमूचे सत्त्वधवलस्मितधौताधरद्युतिः[60] ॥ २४ ॥

उक्तं हितं महामात्य भवता सचिवोचितम् ।
किं त्वर्थिजनवैमुख्यसंतापं नाहमुत्सहे[61] ॥ २५ ॥

देहीतिवादिषु[14] गिरो[62] निषेधपरुषाक्षराः ।
स्फुरन्ति वदने[63] येषां सजीवास्ते[64] गतासवः[65] ॥ २६ ॥

इदमस्मादवाप्स्यामीत्याधाय[66] हृदि याचकः[67] ।
प्राप्तः प्रयाति[68] वैमुख्यं [69]-यस्मात् किं-[69] तेन जीवता ॥ २७ ॥

---

54 With C, देव° ABD. 55 With B, °दिनं AD. 56 With B, °रीर AD. 57 With s.a. B and em. C, °प्रदे ABD. 58 With s.a. B and em. C, cf. T, भवत्यवतिष्ठन AD, भवत्यवतिष्ठन् B. 59 With B, °मावर्ण्य AD. 60 With B, °धोताधर° A, °धोताभर° D. 61 With B, °साहे AD. 62 With s.a. B and em. C, गिरौ ABD. 63 With s.a. B and em. C, cf. T, वचने AB, वचन D. 64 With B, °वस्ते AD. 65 With B, °ताशवः AD. 66 With B, °वास्स्या° AD. 67 °चगः D. 68 With B, °यास्ते AD. 69 Em., cf. T, यस्मीक्तं AD. यस्मिन् किं B.

[13] °नैष्फ° A(9a). [14] वादि° D(10a).

[15]धिग्जन्म पुण्यहीनस्य तस्य निष्करुणात्मनः ।
[16]यस्यार्तजनसंतापश्रवणे[70] शीतलं मनः ॥ २८ ॥

[17]एतदर्थमयं कायः सापायो[71] ऽपि सतां प्रियः ।
यत्कस्यचित् क्वचिद् याति कदाचिदुपकारिताम्[72] ॥ २९ ॥

श्रुत्वेति नृपतेर्वाक्यममात्यः सत्त्वशालिनः[73] ।
नोवाच किंचिदचलां विचिन्त्य[74] भवितव्यताम् ॥ ३० ॥

ततः कदाचिद्भूभर्तुस्तस्य लीलाविहारिणः[75] ।
जायां जयप्रभां नाम रतिं रतिपतेरिव[18],[76] ॥ ३१ ॥

दूराद्यदृच्छयायातश्चित्तसारङ्गवागुराम्[77] ।
मुनिरध्यापकः कान्तां[78] ददर्श विनिमेषदृक् ॥ ३२ ॥

प्राग्जन्मान्तरसंबन्धस्नेहात्परिचितामिव[79] ।
तां[80] दृष्ट्वा[81] स धृतेः प्राप धैर्यराशिरनीशताम्[82] ॥ ३३ ॥

तस्य वीतस्पृहस्यापि वासनोल्लसितं[83] मनः ।
उत्सृज्य[84] भववैमुख्यमभिलाषभुवं[19],[85] ययौ ॥ ३४ ॥

इयं हि सततस्यूता[86] संततप्रीतितन्तुभिः ।
नापैति[87] सर्वजन्तूनां प्राग्जन्माभ्यासवासना[88] ॥ ३५ ॥

---

70 °श्रपणे A. 71 With B, पपयो AD. 72 °कारताम् B. °करिताम् s.a. B and em. C. 73 With B, °लिनाः AD. 74 With B, विचित्य AD. 75 °व् illegible in A. 76 With B, °रिवः AD. 77 °यातां चि° B. 78 With B, °तं AD. 79 पाग् A. °जन्माभ्याससंब° B. 80 With B, तं AD. 81 With B, दृष्ट AD. 82 With B, धेर्य° AD. 83 With B, पासनोल्लषितं AD. 84 With B, उत्पृज्य AD. 85 °भुपं D. 86 With B, °स्युता AD. 87 नबैति D. 88 With B, प्रग्ज° AD.

[15] B(29). [16] A(9b). [17] C(14). [18] °तेरि° D(10b). [19] °मुख्यम° A(10a).

[20]तदाश्रमपदं[89] प्राप्तः समाप्ताध्ययनव्रतः ।
शिष्यो माणवकः[90] प्राह दक्षिणा गृह्यतामिति ॥ ३६ ॥

स तमूचे न मे वत्स वने वित्तैः[91] [21]प्रयोजनम् ।
तथापि यदि निर्बन्धः श्रूयतां यदभीप्सितम्[92] ॥ ३७ ॥

श्रीसेनस्य क्षितिपतेर्यदि देवी जयप्रभा ।
लभ्यते भवता दातुं तदसौ मम दक्षिणा ॥ ३८ ॥

इत्युक्तं गुरुणा श्रुत्वा शिष्यः कम्पितमानसः ।
अशक्यप्रार्थनालाभे[93] संशयाकुलितो[94] ऽभवत् ॥ ३९ ॥

स गत्वा सततस्वेच्छाविवृतद्वारमर्थिनाम् ।
विवेश [95]-स्वैरविश्रम्भं भवनं-[95] भूभृतां प्रभोः ॥ ४० ॥

[22]अलभ्यार्थार्थनादैन्यचिन्तातिस्तब्धमानसः[96] ।
नम्राननो ऽतिवैलक्ष्याद्[97] वीक्षमाण इव क्षितिम् ॥ ४१ ॥

तं दृष्ट्वार्थिनमायातं प्रहृष्टो[98] ऽभून्महीपतिः ।
सुधाप्रदानसंनद्धसमुद्भूतिरिवाम्बुधिः[99] ॥ ४२ ॥

---

89 With s.a. B and em. C, तमाश्र° ABD. 90 With s.a. B and em. C, °वकं ABD. 91 Em., वित्तेः AD, वृत्तिः B. 92 With B, °भीप्सतं AD. 93 With em. B, °प्रार्थलाभे AD. 94 With B, मंशयकु° A, संशयकु° D. 95 Em., cf. T, °श्रम्भभवनं ABD. 96 Em., cf. T, °तातिमानसः AD, °तातिक्लिष्टमानसः em. B. 97 With s.a. B and C, °लक्षाद् ABD. 98 With B, °ष्ट AD.
99 With B, °भूति इवां° AD.

[20] B(31). [21] D(11a). [22] A(10b).

किं तवेप्सितमित्युक्त्वा[100] पूजित:[101] स महीभुजा ।
[23]उवाचानुचिताख्यानवैलज्जस्खलिताक्षर:[102] ॥ ४३ ॥

[24],[103]-अनर्थिते परै:-[103] पूर्वमर्थिकल्पतरोस्तव ।
गुर्वर्थमर्थितां[104] यात: सुदुर्लभपदे ऽप्यहम् ॥ ४४ ॥

मम विद्याव्रते पूर्णे[105] दक्षिणाभिमता गुरो: ।
राजञ्जयप्रभा देवी दीयतां यदि शक्यते ॥ ४५ ॥

इत्युक्ते मुनिशिष्येण सहसैव महीपते: ।
स्नेहदानरसाविद्धं[106] द्विधाभूतमभून्मन: ॥ ४६ ॥

स जगाद द्विजं दन्तज्योतिषाग्रविसारिणा[25],[107] ।
गृह्यतां दयिता[108] स्वच्छवाससाच्छादयन्निव[109] ॥ ४७ ॥

अविचार्य मया देयमीप्सितं[110] तव यद्गुरो: ।
वियोगचकितं[111] चेत: सत्यं न गणयाम्यहम् ॥ ४८ ॥

[112]-इत्युक्त्वाहूय दयितां-[112] राजा राजीवलोचनाम् ।
सदा [26]हृदयसंसक्तां जीववृत्तिमिवापराम् ॥ ४९ ॥

---

100 With B, •युक्त्व AD. 101 With B, पुजित AD. 102 With B, •वैलज्यस्• AD. 103 Em., cf. T, •थितपर: ABD. 104 With B, गुरार्थ• AD. 105 With B, पूर्ण AD. 106 With B, •विद्ध AD. 107 With B, •विपारिणा AD. Editor notes •बिवारिणा as the original text reading in B. 108 With em. B, दयिनां AD. 109 With B, •वससाच्छदयिन्नव AD. 110 With em. B, देवयमीस्सितं AD. Editor notes देवयमीप्सितं as the original text reading in B. 111 पियो• D. 112 With s.a. B and em. C, cf. T, इत्युक्ता हृदयदयितां AD, इत्यक्त्वा हृदयदयितं B.

[23] D(11b). [24] B(33); C(15). [25] •ग्रवि• A(11a). [26] D(12a).

निवारितो[113] ऽपि गुरुणा वियोगव्यसनाग्निना[114] ।
निषिद्धो ऽप्यतिवृद्धेन[115] स्नेहेन स्मरबन्धुना ॥ ५० ॥

प्रददौ मुनिशिष्याय[116] सहसा हरिणीमिव[117] ।
किमेतदिति सायाससंत्रासतरलेक्षणाम्[118] ॥ ५१ ॥

[27]दत्तायास्त्यागशीलेन[119] प्रियाया:[120] पृथिवीभुजा ।
चकम्पे त्यागभीतेव भूमिर्लोलाब्धिमेखला[121] ॥ ५२ ॥

यत्कृते दुर्दशां देहे सेहिरे[122] दु:सहामपि[28],[123] ।
इन्द्रचन्द्रादयो[124] देवास्ता: प्रिया:[125] कस्य न प्रिया: ॥ ५३ ॥

शीलं केचिद्धनं केचिद्धर्मं केचित्तप:[126] परे ।
लज्जां[127] केचित्तनुं केचित्तत्यजुर्योषितां कृते ॥ ५४ ॥

यदेव रागसर्वस्वं[128] पुंसां जीवितजीवितम् ।
तदेव स्फीतसत्त्वानां[29] दाने तृणलवायते ॥ ५५ ॥

तामादाय गते तस्मिन्[129] विरहाकुलितो नृप: ।
रतिहीन:[130] सुखद्वेषी मनोभव इवाभवत् ॥ ५६ ॥

---

113 With B, नीवारिते AD. 114 With B, वियोगव्यपना° A, पियोगव्यवना° D. 115 With B, स्यति° AD. 116 With B, °शिष्यय AD. 117 With B, °रिणि° AD. 118 With B, सयास° AD. 119 शीलेन with s.a. B and em. C, °शीलिन ABD. दत्तायां त्याग° s.a. B and em. C. 120 °यायां s.a. B and em. C. 121 With B, °मिलोला° AD. 122 With B, सहि° AD. 123 With B, °हासापि AD. 124 With B, °चन्द्रद° AD. 125 With B, प्रिया AD. 126 With B, °चितप: AD. 127 With B, लज्ज 128 °ग° illegible in A. 129. With B, दस्मिन AD. 130 Em., cf. T, विरहीन: AD, विरहिण: B, विरहेण C.

[27] B(35). [28] °सहा° A(11b). [29] °सत्त्वा° D(12b).

शिष्येण मुनिरानीतां दृष्ट्वा भूपतिवल्लभाम् ।
रहितां[131] जीवितेनेव परलोकभुवं गताम् ॥ ५७ ॥

गाढानुशयसंतप्तः परं लज्जानिमीलितः ।
अचिन्तयदनौचित्यमात्मनः[132] कर्मविप्लवात्[133] ॥ ५८ ॥

[30]अहो नु बालकेनेव मया[134] केवलचापलात् ।
निःशङ्कमयशःपङ्के[31],[135] स्वयमात्मा[136] निपातितः[137] ॥ ५९ ॥

[32]इयं[138] प्रजानां जननी[139] [140]-धर्मेणाधर्मकारिणा-[140] ।
वर्णाश्रमगुरोर्जाया मया दुःखानले ऽर्पिता ॥ ६० ॥

[141]-किं नु-[141] नाकलितं शीलं न स्मृतः संयमो[142] मया[143] ।
गणितं नैव[144] वैराग्यं विवेको नावलोकितः[33] ॥ ६१ ॥

अहो ऽत्र निर्विचाराणां सन्मार्गविमुखं मनः ।
असंयमासवक्षीवमपथेष्वेव[145] धावति ॥ ६२ ॥

इति संचिन्त्य[146] स मुनिर्वैलक्ष्यक्षपितद्युतिः[147] ।
अभ्येत्य[148] राजदयितामुवाच विनताननः ॥ ६३ ॥

---

131 With B, °हिती AD. 132 With B, °दनोचि° AD. 133 कर्मव° D. 134 With B, मय AD. 135 With B, निशं° AD. 136 With B, °मात्मनि AD. 137 With B, °पतितः AD. 138 With B, अयं AD. 139 जनना A. 140 धर्मणाधर्म°A, धर्म्याणां धर्म° B. 141 Em., cf. T, किन्तु ABD. 142 With B, °यामो AD. 143 With B, मोया AD. 144 With B, नैर AD. 145 With B, °क्षिवमवटेष्वेव AD. 146 °चित्य C. 147 वैलक्ष्य with s.a. B and em. C, °वैलक्ष° ABD. °क्षवितं° D. °द्यु° illegible in D. 148 With B, °त्या AD.

[30] C(16). [31] °शःपङ्° A(12a). [32] B(37). [33] °वलो° D(13a).

समाश्वसिहि हे मातर्न शोकं कर्तुमर्हसि ।
भवितव्यतयैवायं[149] क्लेशस्ते दुर्नयश्च मे ॥ ६४ ॥

[150]-त्यक्त्वा त्वं श्रमसंतापमस्य-[150] तीरतरोरधः ।
[34]अधुनैव[151] निजं धाम[152] सहास्माभिर्गमिष्यसि[153] ॥ ६५ ॥

इत्युक्ते मुनिना देवी सिक्तेवामृतवृष्टिभिः[154] ।
अवाप्तजीवितधृतिस्तत्याज[155] भयसंभ्रमम् ॥ ६६ ॥

श्रुत्वैतत् त्रिदिवव्यापि दातुश्चरितमद्भुतम् ।
राज्ञः सत्त्वदयां ज्ञातुं वासवः समुपाययौ[35] ॥ ६७ ॥

[36]भक्षिताधःशरीरार्धो[156] व्याघ्रेण विजने वने ।
[157]-पुत्रैश्चतुर्भिः साकरन्दैर्गृहीतो-[157] ब्राह्मणाकृतिः ॥ ६८ ॥

प्रस्रवद्भूरिरुधिरो लम्बमानान्त्रमण्डलः ।
[158]-कृच्छ्रे ऽप्यपणितप्राणः-[158] पापैरिव दृढीकृतः ॥ ६९ ॥

प्रत्यग्रामिषगन्धेन करव्यादैर्भृशमन्वितः[159] ।
लुब्धपार्थिवचौरोत्थैरनर्थैरर्थवानिव[160] ॥ ७० ॥

---

149 भवितव्यतायं वायं B, भवितव्यतयैवायं s.a. B and em. C. 150 त्यक्त्वा with B, तक्त्वा AD. त्वं श्रमसं॰ em., cf. T, आश्रमसं॰ AD, हि श्रमसं॰ or [त्यक्त्वा]तिश्रमसं॰ s.a. B, हि श्रमसं॰ em. C. 151 With B, ॰नैप AD. 152 With B, ध्वम AD. 153 ॰हात्मभि॰ B, ॰हास्मभि॰ s.a. B and em. C. 154 सेक्ते॰ D. 155 With B, ॰धृतिस्त्याज AD. 156 With B, ॰शरिरा॰ AD. 157 ॰तुर्भिराकरन्दै॰ B. 158 Sc. er., कृच्छ्रे स्यपणितप्राणः AD, कृच्छ्रेष्वपणितप्राणः B, कृच्छ्रेष्वपगतप्राणः s.a. B and em. C. 159 With B, ॰दैर्भूश॰ AD. 160 With B, ॰रोत्थिरनर्थैरर्थवानिवान AD.

[34] A(12b). [35] स॰ D(13b). [36] B(39).

नगरान्तरमासाद्य स ययौ पुरवासिनाम्[161] ।
कारुण्यदैन्यदुःखार्तो[37],[162] भयविस्मयहेतुताम्[163] ॥ ७१ ॥

स शोक इव साकारः स त्रास इव दुःसहः ।
विदधे साध्वसायासं[164] सहसा पौरयोषिताम् ॥ ७२ ॥

सो ऽर्थिसंदर्शनस्थानस्थितस्याथ[165] महीपतेः ।
पुत्ररूपैश्चतुर्भिस्तैर्न्यस्तो[166] ऽग्रे मञ्चिकार्पितः[38] ॥ ७३ ॥

[39]तं दृष्ट्वा वैशसावेशविषमक्लेशविह्वलम्[167] ।
निष्कूणिताननवनो[168] जनो ऽभून्मीलितेक्षणः[169] ॥ ७४ ॥

स कम्पविह्वलं [170-]वक्षोमुक्तमुद्यम्य[-170] दक्षिणम् ।
भुजं जगाद भूपालं व्यथाशिथिलिताक्षरः ॥ ७५ ॥

[40]स्वस्ति तुभ्यं महीपते ब्राह्मणो ऽहमिमां दशाम्[171] ।
तीव्रपाप इव प्राप्तः पश्य मां करुणानिधे[172] ॥ ७६ ॥

संसारघोरगहने वने व्याघ्रेण भक्षितः ।
जीवाम्यवश्यभोग्यत्वाद्दुःखस्यास्य[41],[173] गरीयसः ॥ ७७ ॥

---

161 With B, °वासिनी AD. 162 With B, °खार्त AD. 163 With s.a. B and em. C, भ्रमवि° ABD. 164 With B, साद्यसा° AD. 165 With B, °शनास्थानास्थि° AD. 166 With s.a. B and em. C, °तैर्व्यस्तो ABD. 167 With s.a. B and em. C, °सावैश° ABD. 168 निष्कुणि° B, निष्कूणि° s.a. B and em. C. 169 भाद्यी° D. 170 With s.a. B, वक्षमुक्तमुद्दस्य AD, वक्षमुक्तमुद्दम्य B, वक्षोमुक्तमुदस्य alternative s.a. B, वक्षो मुक्तमुद्यम्य em. C. 171 With B, दशं AD. 172 With B, कारुणानिधेः AD. 173 With B, °त्वद्दुः° AD.

[37] कारु° A(13a). [38] मञ्चि° D(14a). [39] C(17). [40] B(41). [41] जीवा° A(13b).

अस्मिन्नपि विपत्तापे तीव्रक्लेशसहिष्णव:[174] ।
विमुञ्चन्ति[175] न मां प्राणा: सुहृद: सज्जना इव ॥ ७८ ॥

ददाति यदि ते कश्चिच्छित्त्वा देहार्धमात्मन: ।
तत्ते जीवितमस्तीति[42],[176] मामूचे व्योमदेवता ॥ ७९ ॥

को ददाति जगत्यस्मिञ्जीवितं[177] करुणानिधे ।
प्रायेण स्वसुखान्वेषी[178] परार्थविमुखो[179] जन: ॥ ८० ॥

सर्वदा सर्वदातारं दीनव्यसनबान्धवम्[180] ।
देहदाने ऽप्यविमुखं[181] त्वामस्मि शरणं गत: ॥ ८१ ॥

एकस्त्वमेव लोके ऽस्मिञ्जात:[182] सुकृतपादप: ।
निर्व्याजमादरोदारं दानं[183] यस्य फलोद्गति: ॥ ८२ ॥

किमन्यैर्वा[184] वदान्यस्य[185] कीर्तितैर्भवतो[186] गुणै: ।
दानमेवाहतो यस्य [43]लोके सुकृतडिण्डिम:[187] ॥ ८३ ॥

[44]आपन्नार्तिपरित्राणपवित्रचरित्तव्रता:[188] ।
प्राप्यन्ते[189] पुण्यपण्येन विपत्काले भवद्विधा:[190] ॥ ८४ ॥

---

174 With B, °हिष्णुव: AD. 175 पिमुञ्ज° D. 176 With B, जीवत° AD. 177 With B, °स्मिन्नजी° AD. 178 With B, °वेषि AD. 179 °पिमुखो D. 180 With B, °बन्धवं AD. 181 With B, स्यवि° AD. 182 With B, स्मे° AD. 183 With B, दान AD. 184 With em. B, cf. T, किममैर्व AD. 185 पदा° D. Editor notes वदानस्य as the original text reading in B. 186 With B, °तिस्तेर्भ° AD. 187 With B, °दिण्डि° AD. 188 With B, m.c., °चरित ° AD. आपन्नर्तिपरत्रा° D. 189 With B, प्रास्यन्ते AD. 190 With B, भविद्वधा AD.

[42] °स्ती° D(14b). [43] A(14a). [44] B(43).

अमन्दानन्दसुह्रदो हरिचन्दनशीतलाः ।
हरन्ति सन्तः संतापं [45]दक्षिणाः[191] पवना[192] इव ॥ ८५ ॥

पूर्णेन्दुसुन्दरादस्मादुदिता वदनात्तव ।
ज्योत्स्नेव जीवयत्येव[193] वाणी[194] पीयूषवर्षिणी ॥ ८६ ॥

इत्युक्तस्तेन[195] सहसा हृदि संक्रान्ततद्व्यथः ।
संमोहमूर्छितं राजा [196-]तमुवाच त्वराकुलम्[-196] ॥ ८७ ॥

समाश्वसिहि मुञ्च त्वं भयं प्राणवियोगजम् ।
प्रयच्छामि[197] शरीरार्धमविचार्यैव[198] ते द्विज ॥ ८८ ॥

[46]धन्यस्य यात्ययं[199] कायः परोपकृतये[47],[200] क्षतिम् ।
क्षणक्षयी हि देहो ऽयं रक्ष्यमाणो[201] ऽपि नाक्षयः ॥ ८९ ॥

इत्युक्तवति[202] भूपाले समुत्कम्पितमानसः ।
वज्राहत इवोवाच महामात्यो महामतिः ॥ ९० ॥

अहो नु साहसाभ्यासादायासव्यसनी[203] प्रभुः ।
हितं[204] न गणयत्येव[48] प्रजापुण्यपरिक्षयात् ॥ ९१ ॥

---

191 With B, °णा AD. 192 With B, पवन AD. 193 With B, जिव° AD. 194 With B, वणी AD. 195 With B, इत्युक्त तेन AD. 196 Em., cf. T, तमूर्खवाचराकुलं AD, तमूचे वाचमाकुलम् em. B. 197 With B, °च्छमि AD. 198 With B, °येव AD. 199 With B, यात्येयं AD. 200 With B, °सकृतय AD. 201 With B, रक्षमा° AD. 202 With B, °वाति AD. 203 With B, m.c., cf. T, °भ्यासायसव्यपनी AD. 204 With B, हतम A, हितम D.

[45] D(15a). [46] C(18). [47] °पकृ° A(14b). [48] गण° D(15b).

[49]प्रजानां भूतये शक्तः को ऽन्यस्त्वत्सदृशो गुणी ।
यद्भक्तिमुखरो भृत्यः श्रोता कर्ता[205] च भूपतिः ॥ ९२ ॥

न करोति हितं स्वामी गजलीलानिमीलितः[206] ।
गणनीयाः सुभृत्यानामियत्यो[207] भोगसंपदः ॥ ९३ ।

भातु[208] ते सुचिरं कर्णे या[209] कृता मधुमञ्जरी[210] ।
कल्याणकर्णिकाकीर्णा[211] वाणी[212] विनयवादिनाम् ॥ ९४ ॥

राक्षसो ऽयं पिशाचो वा छद्मना ब्राह्मणाकृतिः[213] ।
रक्षारत्नस्य जगतां [214]-शरीरे[50] यो ऽर्थितां-[214] गतः ॥ ९५ ॥

यदि नाम न मायेयं कृता[215] तेन महीयसी ।
तत्कथं कृत्तदेहस्य क्षणमप्यस्ति जीवितम् ॥ ९६ ॥

अविचार्यैव सुकृतं क्रियते दुर्ग्रहेण यत् ।
तदात्मपीडापरुषं[216] परलोके ऽपि निःसुखम्[51] ॥ ९७ ॥

शक्यमेव[217] सदा दद्यादशक्यं[218] दीयते[219] कथम् ।
सर्वस्वदेहदानादिप्रवादा[220] एव शोभनाः[221] ॥ ९८ ॥

---

205 With B, कार्ता AD. 206 °लीलनि° D. 207 With B, cf. T, °यभ्यो AD. 208 Em., भाति AD, भान्ति B. 209 Em., यैः ABD. 210 With B, मधुर्म° AD. 211 With B, °कर्णिकाः किर्णा AD. 212 With B, वाणि AD. 213 With B, °कृतीः AD. 214 Em., शरीरैर्यो थितां AD, शरीरैरर्थितां B. 215 With B, कृत AD. 216 °डावरु° D. 217 With B, शाक्य° AD. 218 With B, दद्यात अशाक्यं AD. 219 With B, दीयत A. 220 °नादि प्रवाद B, °नादिप्रवाद C. 221 °भनः B.

[49] B(45). [50] श° A(15a). [51] निःसु° D(16a).

कर्णामृतमिदं दूराद्यन्महाब्धिर्मणिप्रद:[222] ।
संप्राप्तानां पुनस्तत्र पानमप्यन्यतो[223] ऽर्थिनाम् ॥ ९९ ॥

[52]रक्ष्य:[224] सर्वप्रयत्नेन परेषामपि[225] जीवितै:[226] ।
प्रजानां जीवितं राजन्नर्थिचिन्तामणिर्भवान् ॥ १०० ॥

प्रसीद दययास्मासु[227] देव मा साहसं कृथा: ।
न काचशकलस्यार्थे[228] क्रियते चात्मविक्रिय:[229] ॥ १०१ ॥

इत्युक्त्वा पादयो:[53] पत्यु: पपातामात्यपुंगव: ।
शरीरदानसंकल्पान्नोच्चचाल[230] च भूपति: ॥ १०२ ॥

[54]सो ऽवदत्प्रणयस्मेरविकसद्दशनद्युति:[231] ।
जीवितस्नेहसंमोहतम: परिहरन्निव[55] ॥ १०३ ॥

केवलं भक्तिसंयुक्तमुक्तं[232] व्यक्तमिदं[233] त्वया ।
न सहे ऽहं महामात्य विप्रस्य प्राणसंशयम् ॥ १०४ ॥

हारैस्तुषारै: कमलैर्मृणालैरिन्दुचन्दनै:[234] ।
निवर्तते ऽन्त:संताप: नार्थिवैमुख्यदु:खज:[235] ॥ १०५ ॥

---

222 दूराद्य with B, दूरय° AD. महाब्धिर्मणिप्रद: em., cf. T, °महार्थिमणिप्रद: ABD. 223 Em., cf. T, मानतेमस्यन्यतो AD, पानमस्यान्यतो em. B. 224 With B, रक्ष AD. 225 परषा° A. 226 With B, °विते: AD. 227 दयस्वास्मासु s.a. B and em. C. 228 With B, °सकल° AD. 229 With B, क्रय: AD. 230 With B, °कल्पानुच्च° A, °कल्वानुच्च° D. 231 With B, °सन्दश° AD. 232 With B, °मुक्त AD. 233 With B, °मिद AD. 234 With B, कमलेर् AD. 235 °वेमु° A.

[52] B(47). [53] पा° A(15b). [54] B(19). [55] प° D(16b).

सर्वथा सर्वदु:खार्तिहरणोद्यतचेतस:[236] ।
न बोधेरन्तरायं मे सुमते कर्तुमर्हसि[237] ॥ १०६ ॥

जन्मान्तरे ऽपि ददतो देहं मे न व्यथाभवत् ।
स्मराम्यतीतवृत्तस्य सम्यक्संबोधिचेतसा ॥ १०७ ॥

[56]पुरा दृष्ट्वोद्यतां व्याघ्रीं क्षुत्क्षामां पोतभक्षणे[57] ।
तद्रक्षायै मया दत्तं शरीरमविकारिणा[238] ॥ १०८ ॥

शिबिजन्मनि चान्धाय दत्तं नेत्रयुगं मया[239] ।
रक्षितश्च स्वदेहेन कपोत:[240] श्येनजाद्भयात्[58],[241] ॥ १०९ ॥

चन्द्रप्रभावतारे च रौद्राक्षायार्पितं शिर: ।
सर्वस्वपुत्रदारादि[242] दत्तं चान्येषु जन्मसु ॥ ११० ॥

इत्युक्ते बोधिसत्त्वेन भूभुजामात्यवर:[243] ।
न सजीवो न निर्जीव इवाभूद्व्यथितेन्द्रिय: ॥ १११ ॥

अलङ्घ्यशासनेनाथ[244] राज्ञा क्रकचधारया ।
नियुक्तौ पुलगण्डाख्यौ शरीरच्छेदकर्मणि[245] ॥ ११२ ॥

---

236 With B, *खार्त हरणोद्यात* AD. 237 गर्तु* D. 238 Em., cf. T, *विक्षरिणा ABD. *विनाशिना or *विचारिणा s.a. B. 239 मय A. 240 With B, *पोत AD. 241 Em., cf. T, श्येनकादभ* AD, श्येनकाद्भ* B. 242 *राद्वि D. 243 Em., भूभुजां ममात्यवर: A, भूभुजाममात्यवर: B, फूफुजं मामात्यपर: D. *Pāda* b has one syllable missing. भूभुजामात्यपुंगव: s.em. with s.a. B and em. C, cf. verse 102. 244 With s.a. B and em. C, *शासानिनाथ AD, *शासनिनाथ B. 245 With B, *रच्चेद* AD.

[56] B(49). [57]] *भक्ष* A(16a). [58] *जाद्* D(17a).

तौ तीव्रशोकविवशौ शक्रमायाविमोहितौ ।
कथंचिदिव[246] भूभर्तुर्दैहच्छेदे[247] समुद्यतौ ॥ ११३ ॥

नृपतेर्निर्विकारस्य[248] क्रूरक्रकचधारया ।
[59]विदार्यमाणे देहार्धे पृथिवी समकम्पत ॥ ११४ ॥

भ्रष्टोल्कारक्तवसना[249] निर्घातच्युततारका[250] ।
द्यौः सशब्दं[251] रुरोदेव कीर्णाश्रुकणसंततिः[60] ॥ ११५ ॥

[61]वैशसालोकनोद्भूततीव्रदुःखासहिष्णुना[252] ।
तूर्णं रजःपटेनेव रविणा[253] पिहितं मुखम् ॥ ११६ ॥

[62]तस्मिन् प्रजाः प्रजानाथे क्रकचाक्रान्तविग्रहे ।
चक्रन्दुः पूरिताक्रन्दा[254] दिग्वधूभिः प्रतिस्वनैः ॥ ११७ ॥

अतुच्छसत्त्वमालोक्य[255] नृपं शक्रो द्विजाकृतिः[256] ।
विस्मयानुशयाक्रान्तचित्तश्चिरमचिन्तयत्[257] ॥ ११८ ॥

अहो महामतेरस्य करुणाकोमलं मनः ।
प्राप्तं परार्थपीडासु[258] वज्रादपि कठोरताम् ॥ ११९ ॥

---

246 With s.a. B and em. C, cf. T, कदाचिदिव ABD. 247 With B, °तुर्दहच्छदे A, °तुर्देहच्छदे D. 248 With B, °तेनिर्वि° AD. 249 भ्रष्टोल्का रक्त° B. 250 With B, °रका: AD. 251 With B, सशब्द A, सशप्दं D. 252 With B, °दुःखस° AD. 253 With B, °विना AD. 254 With B, °क्रानदा AD. 255 Em., अनुच्छसत्वम्° AD, अनुच्छसत्त्वम्° B, अक्षुब्धसत्त्वं° or अनुच्छूसन्तं° s.a. B. C reads B as अनुच्छ्वसत्त्वम्° and emends to अक्षुब्धसत्त्वम्°. 256 with B, °जकृ° AD. 257 With B, °चिन्तयन AD. 258 With B, °डसु AD.

[59] A(16b). [60] °संत° D(17b). [61] B(51). [62] C(20).

सागरादपि गम्भीरं मेरोरपि समुन्नतम् ।
त्रिदिवादपि[63],259 साश्चर्यमहो वृत्तं महात्मनाम् ॥ १२० ॥

अहो प्राणप्रवासे ऽपि सत्त्वं सत्त्वमहोदधेः260 ।
साधोरिव विपत्पाते261 महत्त्वं नावहीयते262 ॥ १२१ ॥

इति [64]चिन्तयति क्षिप्रं सहस्राक्षे क्षितिप्रभोः ।
नाभेरधःशरीरार्धं निष्कृत्तमपतत्263 क्षितौ ॥ १२२ ॥

स द्विधाभूतदेहो ऽपि हर्षोत्साहमयो ऽभवत् ।
सर्वभूतपरित्राणसत्त्वेन धृतजीवितः ॥ १२३ ॥

[65]तदाज्ञया शरीरार्धे श्लिष्टे संपूर्णविग्रहः ।
स्वस्थक्षतिः264 समुत्थाय ब्राह्मणस्तमभाषत ॥ १२४ ॥

अहो विराजते265 राजन् पूज्यं विरजसस्तव266 ।
निर्व्याजदेहदानेन विशेषाद्यशः267 ॥ १२५ ॥

त्वन्मनोमणिवैमल्यतुल्यं268 किंचिदकुर्वतः ।
उपमानेन[66] दारिद्र्यमहो मुग्धस्य वेधसः ॥ १२६ ॥

---

259 °दिवद° A. 260 With B, सत्वं महो° AD. 261 With B, विसत्पा° AD. 262 With B, °हिमते AD. 263 With B, निष्कृत्तमपति AD, निकृत्तमपतत् C. 264 With C, cf. T, °क्षिति AD, °क्षितिः B. 265 Em., °जसे ABD. 266 With B, °स्तवी AD. 267 Em., विशेषदयशः AD, विशेषन्तु भवद्यशः em. B. Editor notes विशेषद्यशः as the original text reading in B. *Pāda* d has three syllables missing. विशेषादमलं यशः s.em., m.c., cf. T. 268 With s.a. B and em. C, °विमल्य° AD.

[63] °दिवा° A(17a). [64] D(18a). [65] B(53). [66] उपमा° A(17b).

कृत्तः सुवृत्तः सरलः परार्थे मधुराशयः ।
सहसे दुःसहां[269] [270]-पीडामिक्षुकाण्ड इवोन्नतः-[270] ॥ १२७ ॥

इत्युक्त्वा[271] ब्राह्मणाकारः शक्रस्तं स्मृतिजन्मभिः[67] ।
संजीवन्नौषधीजातैः[272] सुधास्यन्दैरपूरयत् ॥ १२८ ॥

ततः प्रकटिताकारः परितोषात्पुरंदरः ।
सुश्लिष्टनिजदेहार्धं[273] प्रशशंस महीपतिम् ॥ १२९ ॥

अथाम्बरान्निपतितः सितकुसुमसंचयः ।
तत्कालोल्लासितक्षोणीहर्षहास इवाबभौ ॥ १३० ॥

[68]अत्रान्तरे मुनिस्तस्मै[274] प्रियां जायां जयप्रभाम्[275] ।
आदायाभ्येत्य तद्वृत्तजाताश्चर्यो[276] न्यवेदयत् ॥ १३१ ॥

[69],[277]-स तया-[277] संगतः पत्न्या स्वकीर्त्येव विशुद्धया ।
उवाच पृष्टः शक्रेण[70] निकारे निर्विकारितः[278] ॥ १३२ ॥

ततः सिंहासने[279] दिव्ये विश्वकर्मविनिर्मिते[280] ।
रत्नवर्षसमाकीर्णे[281] जम्बूद्वीपे[282] स भूपतिः ॥ १३३ ॥

---

269 With B, °सहा AD. 270 With s.a. B and em. C, °काण्डमिवो° ABD. 271 With B, मित्यु° AD. 272 Em., m.c., संजीवनौषधि° AD, सञ्जीवन्नौषधि° B, सञ्जीवनौषधि° s.a. B and em. C. 273 With B, °निजदेवदेहार्धं AD. 274 With B, मुनितस्मै AD. 275 With B, जप्रयं भं A, जप्रयं भं D. 276 तद्वृत्तं जा°B. 277 Sc. er., प तया AD, पूतया em. B. 278 With B, °कारिता AD. 279 With B, सिंहापशे AD. 280 °गर्मविनि° D. 281 With B, °समकी° AD. 282 जम्बु° B.

[67] स्मृ° D(18b). [68] C(21). [69] B(55). [70] शक्रे° A(18a).

अभिषिक्तः सुरेन्द्रेण[283] प्रसाद्य दयितासखः[71] ।
दानपुण्यप्रभावोत्थकुशलव्यापितप्रजः[284] ॥ १३४ ॥

समास्तसत्त्वसंसारसंतारणकृतव्रतः[285] ।
सम्यक्संबोधिसंबुद्धमनाः[286] प्रमुदितो ऽभवत् ॥ १३५ ॥

मैत्रं चेतस्तरुणकरुणं सत्त्वसिद्धं विशुद्धं[287]
आपन्नार्तिप्रशमनफलस्फीतमात्मप्रदानम्[288] ।
दृष्ट्वा राज्ञः प्रमुदसलिलक्षालिताक्षो[289] विलक्षः
शक्रः प्रायादमरनगरीं[290] पूरितां तद्यशोभिः ॥ १३६ ॥

इति स विबुधवृन्दैः[291] सिद्धयक्षोरगेन्द्रैः
पुलकरुचिरवर्चैरर्च्यमानप्रभावः[292] ।
अवनिभवनशक्तः[72] कल्पयन्नाककल्पाम्[293]
अभवविभवशोभामाप्तवान् बोधिसत्त्वः ॥ १३७ ॥

[73],294-पूर्वावतारसंवादे दानोत्कर्षमुदाहरन्-294,[74] ।
उपदेशाय भिक्षूणामित्याह भगवाञ्जिनः ॥ १३८ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां 295-श्रीसेनावदानं
द्वितीयपल्लवः-295 ॥

---

283 With B, °द्रेन AD. 284 With B, °त्थाकुशलाव्या° AD. 285 Em., cf. T, समप्त° AD, समाप्त° B. 286 With B, cf. T, m.c., °बोधिबुद्ध° AD. 287 With B, °शुद्धां AD. 288 With B, आपन्नर्ती° AD. 289 प्रमुद with s.a.B and em. C, m.c., प्रमोद° ABD. क्षालिताक्षो with em. B, °क्षालितां भो AD. 290 With B,°गरी AD. 291 With B, °भृन्दैः AD. 292 वुलक° D. 293 With B, °यन्नक° AD. 294 With B, °वादेर्दानो° AD. 295 दानं with B, °दानां AD. °दानं नाम द्वितीयः प° B.

[71] दयि°D(19a). [72] °श्रव° A(18b). [73] B(57). [74] °कर्ष° D(19b).

[1][३. मणिचूडावदानम्][1]

अस्मिन्नद्भुतसर्गे मकराकरजायमानमणिवर्गे ।
को ऽपि प्रकटितसुगतिः[2] पुरुषमणिर्जायते जगति[3] ॥ १ ॥

अस्ति सौधप्रभापूरकर्पूरपरिपाण्डुरम्[4] ।
[5]-साकेतं नाम-[5] नगरं सौभाग्यतिलकं[6] भुवः[7] ॥ २ ॥

सेव्यैः[8] प्रभासत्त्वमयैर्गङ्गाविमलमानसैः ।
तीर्थैरिवास्थितं[9] यत्र पवित्रैः[2] पुण्यकर्तृभिः ॥ ३ ॥

यशःकुसुमिते यत्र पुण्यसौरभनिर्भरे ।
रमन्ते सुकृतोद्याने नन्दने पुरवासिनः[3],[10] ॥ ४ ॥

तत्राभूद्[11] भूपतिर्भूरिगुणरत्नमहोदधिः[12] ।
भूतिर्यशःशशाङ्कस्य हेमचूड इति श्रुतः ॥ ५ ॥

[4]सदा सदाश्रयार्हेण[13] कलिकालापहारिणा[14] ।
कृतः कृतयुगेनेव[15] येन धर्मधरो जनः ॥ ६ ॥

---

1 B starts तृतीयः पल्लवः । मणिचूडावदानम् । C starts ३ मणिचूडावदानम् । 2 With B, सुगतेः AD. 3 Em., जगते AD. जगति is omitted in B. C inserts [भव्यः]. 4 Em., cf. T, सौभिप्र° ABD. Editor of B notes सौभिः [dome] as the equivalent of *ba gam* in T. 5 With C, शाकेतनाम AD, साकेतनाम B. 6 With B, °भाग्यं तिलक AD. 7 With B, भूवः AD. 8 With em. B, सैभ्यैः AD. Editor notes सैव्यैः as the original text reading in B. 9 तीर्थैरिव स्थितं B. 10 °पासिनः D. 11 With B, तत्रभूद AD. 12 With B, भूपतिभूरि° AD. 13 °यार्घेण A. 14 गलि° D. 15 With B, °नैव AD.

[1] B(61); C(22). [2] प° A(19a). [3] पु° D(20a). [4] B(63).

महीपतिः क्षमासक्तः[16] श्रीवृतः[17] करुणारतः ।
वल्लभो[18] ऽभूत् प्रजानां यः प्रख्यातो विजितेन्द्रियः[19] ॥ ७ ॥

अमरासवसंपूर्णामहिंसासत्रदीक्षितः[20] ।
ददौ यः सर्वभूतानां पुण्यामभयदक्षिणाम्[21] ॥ ८ ॥

निर्मदो यः प्रभावे ऽपि विभवे ऽपि प्रियंवदः[5] ।
क्षमाशीलः प्रभुत्वे[22] ऽपि यौवने ऽपि जितेन्द्रियः ॥ ९ ॥

गम्भीरेणोन्नतिमता[23] शूरेण[24] शशिकान्तिना[25] ।
सत्पक्षेण क्षितिभृता[6] येनातन्यत[26] विस्मयः ॥ १० ॥

राज्ञस्तस्याद्वितीयस्य बभूवाभरणद्वयम्[27] ।
त्यागपूर्णञ्च[28] कारुण्यं तारुण्यं सुकृतश्रियः ॥ ११ ॥

पद्माकरस्य तस्याभूद्देवी[29] कान्तिमती[30] प्रिया[31] ।
प्रभातश्रीरिव सदा निर्दोषाभ्युदयोत्सवा[32] ॥ १२ ॥

नीतिः प्रभुगुणेनेव त्यागेन[33] श्रीरिवोज्ज्वला[34] ।
रराज राजचन्द्रेण सा[35] शीलेनेव चारुता ॥ १३ ॥

---

16 Em., क्षमसक्तः AD, क्षमाशक्तः B. 17 With B, श्रीवृत AD. 18 With B, वल्वभो° AD. 19 With B, पिजि° AD. 20 With B, अमारा° AD. °पूर्णम° C. 21 With B, पुण्यम° AD. 22 With B, प्रभू° AD. 23 With B, °तिगता AD. 24 With B, शूरेण AD. 25 With B, शशी° AD. 26 यना° D. 27 With B, °द्वयं: AD. 28 With B, °पर्णां च AD. 29 With B, तस्यां भू° AD. 30 An empty space appears in A for म. 31 With B, प्रिय AD. 32 ओ in °यो° illegible in A. व् in °वा illegible in D. 33 त्यागन A. 34 With B, °वोज्वला AD. 35 With B, स AD.

[5] प्रियं° A(19b). [6] क्षि° D(20b).

[7]सदानन्दनविख्यातयश:प्रसरया तया ।
मेरुस्त्रिदिवलक्ष्म्येव बभौ भूमिभृतां वर: ॥ १४ ॥

काले कल्याणनिलयं भर्तु: सा गर्भमादधे[36] ।
भूत्यै[37] भुवनपद्मस्य दिवाकरमिवादिति:[8],[38] ॥ १५ ॥

[9]अरणि: पावकेनेव वेलेवाब्धे: सुधांशुना[39] ।
ब्रह्माब्जेनेव[40] गोविन्दनाभिर्गर्भेण[41] सा बभौ ॥ १६ ॥

[10]तस्या[42] गर्भानुभावेन दोहदाभिमतं[43] नृप: ।
ददौ[44] सर्वार्थिसार्थेभ्यो[45] वाञ्छिताभ्यधिकं वसु ॥ १७ ॥

पुनर्भूमिभुजा[46] पृष्टा दोहदं शुभगर्भिणी[47] ।
सरस्वतीव[48] सा चक्रे स्वयं सद्धर्मदेशनाम्[49] ॥ १८ ॥

पूर्णपुण्यमणिर्धर्मनिधिर्विधिसमुद्धृत: ।
विपद्विपुलदु:खेभ्य: सदा रक्षति रक्षित: ॥ १९ ॥

कान्तारदुर्गेषु परिच्युतानां
तापातुराणां[50] परलोकमार्गे ।
स्निग्ध: प्रवृद्ध: फलपूरिताश:
छायातरुर्धर्मसमो[51] ऽस्ति नान्य: ॥ २० ॥

---

36 With B, *मादद A, *माददे D. 37 भूत्ये D. 38 दवाक* A. इ in *मि* illegible in A. 39 With B, सुधंशु* AD. 40 With B, *नैव AD. 41 With s.a. B and em. C, गोविन्दनाभिगर्भेण AD, गोविन्दो नाभिगर्भेण B. 42 With B, तस्य AD. 43 पोह* D. 44 With B, ददो AD. 45 With B, *सार्थिभ्यो AD. 46 With B, m.c., *मिभूम AD. 47 With B, *गभिणी A, *गघ्रिणी D. 48 *तिव A. 49 सर्धर्म*A. 50 With B, तापार्तु* AD. 51 With B, cf. T, *यातर्दूर्ध* AD.

[7] B(65). [8] *वा* A(20a). [9] C(23). [10] D(21a).

[11]आलोकस्तिमिरे[52] विपद्विषमणि:[12] पाते[53] करालम्बनं
याच्ञाकल्पतरुर्जगज्जयरथ: पाथेयमन्त्ये[54] पथि ।
दु:खव्याधिमहौषधं भवभयोद्भ्रान्ताशयाश्वासनं[13]
तापे चन्दनकाननं स्थिरसुहृद्धर्म: सतां बान्धव: ॥ २१ ॥

इत्यादि धर्मधवलं श्रुत्वा नृपवधूवच:[55] ।
धर्मैकशरण: श्रीमान् [56]-बभूव भुवने-[56] जन:[57] ॥ २२ ॥

तत: कालेन संपूर्णं द्यौरिवामृतदीधितिम् ।
असूत दारकं देवी[58] जगत्तिमिरदारकम् ॥ २३ ॥

अजायतास्य सहजश्चूडालंकरणं[59] मणि: ।
प्राग्जन्मान्तरसंपृक्तो[60] विवेक[61] इव निर्मल: ॥ २४ ॥

स बभौ सुभगस्तस्य[62] मूर्ध्नि पुण्यमयो[63] मणि: ।
यस्य प्रभाप्रभावेण[64] यामिन्यो दिनतां[65] ययु: ॥ २५ ॥

[14]सोष्णीषस्य[66] मणेस्तस्य [15]पीयूषस्यन्दिबिन्दव: ।
नयन्ति हेमतां लोहं दुरितं[67] शमयन्ति च ॥ २६ ॥

---

52 With em. B, °लोकेति° AD. 53 With B, पादे AD. 54 With s.a. B, पाथ्येयमन्ये AD, पाथेयमन्ये B, पाथेयमन्थे em. C. 55 नृपो वधूवच: B, नृपवधूवच: s.a. B and em. C. 56 With B, cf. T, भूवने AD. 57 With s.a. B and em. C, जने ABD. 58 With em. B, सहिदेवि AD. Editor notes सा हि as another text reading in B. 59 With B, °लंकारणं AD. 60 Em., °संपक्तो AD, संसक्तो B. 61 पिवेक D. 62 With em. B, m.c., cf. T, भगस्त° AD. 63 With B, °मयौ AD. 64 With B, °वेन AD. 65 With B, °नतं AD. 66 With B, °षस्ये AD. 67 With s.a. B and em. C, तुरितं ABD.

[11] B(67). [12] °द्विषम° A(20b). [13] भ° D(21b). [14] B(69). [15] A(21a).

शिशोर्जातिस्मरस्याथ[16] वचसा तस्य भूपतिः ।
ददौ हेम सदार्थिभ्यः सर्वं मणिरसोद्भवम् ॥ २७ ॥

पुष्परत्नध्वजच्छत्रपताकाव्यजनांशुकैः[68] ।
अपूरयन् पुरं व्योम्नि[69] तस्य जन्मनि देवताः[70] ॥ २८ ॥

[17]सुप्रकाशोदिताशेषविद्याविद्योतितात्मनः ।
मणिचूड इति ख्यातं नाम तस्याकरोन्नृपः ॥ २९ ॥

स चकाराशयं हर्षपीयूषोच्छलितं[71] पितुः ।
अभिजातः सुतो जातः पारिजात इवोदधेः[72] ॥ ३० ॥

पौलोमीव[73] जयन्तेन जननी पूज्यजन्मना ।
बभौ तेन कुमारेण कुमारेणेव पार्वती ॥ ३१ ॥

ततः कालेन सुकृतसोपानैः पृथिवीपतौ[18],[74] ।
दिव्यधामसमारूढे[75] मणिचूडो ऽभवन्नृपः ॥ ३२ ॥

अर्थिचिन्तामणेस्तस्य[19],[76] दानेन परिपूरिते ।
लोके पुण्यसुखालोके[77] नार्तो ऽभून्न च याचकः[78] ॥ ३३ ॥

---

68 With s.a. B and em. C, पुष्परत्नध्वजं च्छत्रं पताका° ABD. 69 Em., cf. T, व्योमंन AD, व्योम्नस् B. 70 With B, cf. T, वता AD. 71 पी illegible in A. 72 °दधः A. 73 °मपि D. 74 वी illegible in A. 75 With B, दिव्यनधामसमारुढे AD. 76 With em. B, °मणिस्त° AD. 77 With B, m.c., cf. T, °सुखलोके AD. 78 With B, यचकः AD.

[16] शिशोर्जा° D(22a). [17] C(24). [18] पृथिवी° A(21b). [19] °ताम° D(22b).

[20]तस्य भद्रगिरिर्नाम[79] बभूव गजकुञ्जर:[80] ।
प्रभोरिवानुकारेण दानार्द्रकरपुष्कर: ॥ ३४ ॥

तं कदाचिन्महास्थानस्थितं भुवननायकम्[81] ।
भवभूति: समभ्यायाद् भृगुवंशभवो[82] मुनि: ॥ ३५ ॥

दिव्यकन्यां समादाय लावण्यललिताननाम् ।
मूर्तामिव[83] प्रभालक्ष्मीमक्षीणस्य क्षपापते: ॥ ३६ ॥

कुचयोरविवेकेन रागेण चरणाब्जयो: ।
नेत्रयोश्चापलेनेव[84] सा [85]-जने ऽत्यन्तलज्जिता-[85] ॥ ३७ ॥

तप:श्रियेव सहितं तं कन्यानुगतं मुनिम् ।
अपूजयत् प्रजानाथ:[21] कृतासनपरिग्रहम् ॥ ३८ ॥

कन्यापि[86] [22]नृपमालोक्य[87] धीरं गम्भीरसुन्दरम् ।
परपीडासु[88] कारुण्यान्न्यस्तचापमिव स्मरम्[89] ॥ ३९ ॥

चूडारत्नस्य किरणैर्दुरितक्षयकारिभि:[90] ।
लिखन्तं कुङ्कुमेनेव दिक्षु रक्षाक्षरावलिम्[91] ॥ ४० ॥

---

79 With B, भद्रागिरिर्णाम AD. 80 गजपुङ्गव: B. 81 With B, भुपन° AD. 82 With B, °शभवा AD. 83 With B, मूर्तमिव AD. 84 With B, °श्चपमेनेव AD. 85 Em., cf. T, जने त्यलज्जिता AD, जगत्यतिलज्जिता B. 86 °न्याप्रि A. 87 With B, °लौक्य AD. 88 With B, °पिडा° AD. 89 With B, स्मर: AD. 90 With B, °दुरति° AD. 91 With B, °रवलिं AD.

[20] B(71). [21] प्रजा° A(22a). [22] D(23a).

विक्षेपक्षिप्तमरुता चामरेण विराजितम् ।
सोच्छ्वासेनेव[92] सत्त्वेन जगत्संतारणं विना ॥ ४१ ॥

[23]रत्नोदारेण हारेण हृदयग्रहकारिणा[93] ।
पातालविपदां शान्त्यै[94] शेषेणेव निषेवितम् ॥ ४२ ॥

वहन्तं महता[95] दोष्णा[96] क्षमां चित्तेन च क्षमाम् ।
प्रययौ साभिलाषस्य विस्मयस्य विधेयताम् ॥ ४३ ॥

[24]गृहीत्वा[97] मुनिरुत्सङ्गे कुरङ्गतरलेक्षणाम् ।
जीवनीं तामनङ्गस्य जगाद जगतीपतिम्[25] ॥ ४४ ॥

उदितेन जगन्नेत्रशतपत्त्रविकाशिना[26],[98] ।
भवता[99] भाति[100] लोको ऽयं देवेन च विवस्वता ॥ ४५ ॥

अहो नु तव नास्त्येव विभूतिसुलभोद्भवः ।
साधोरिव गुणद्वेषः संमोहसचिवो[101] मदः ॥ ४६ ॥

लोकनाथस्य[102] [103]-ते लोककारुण्यपूर्णचेतसः-[103] ।
राजन् [104]-मैत्रीजुषस्तारा कीर्तिः-[104] पारमिता परम् ॥ ४७ ॥

---

92 With B, सोच्छ्वसेनेव AD. B reads सोच्छ्वासेनेव as सोच्छासेनेव and suggests सोच्छ्वासेनेव. C reads B as सोच्छासेनेव and emends to सोच्छ्वासेनेव. 93 With B, °कारणा AD. 94 श्रान्त्यै D. 95 With B, महाता AD. 96 With B, cf. T, दोष्ट AD. 97 With B, गृहित्वा A, सृहित्वा D. 98 With em. B, जगन्नेत्रं शत° AD. °पत्रवि° B. 99 With B, भवत AD. 100 With B, भाती AD. 101 Sc. er., संमोहपचिवो AD, सम्मोहोपचितो em. B. 102 With B, °थस्य AD. 103 With B, तेर्मोक° AD. °यापूर्ण° s.em., m.c., cf. T. 104 Em., cf. T, मैत्रीजुषस्थरा कीर्तिः AD, मैत्रीजुषा कीर्त्तिः स्थिरा em. B. Editor notes मैत्रिजुषस्थरा कीर्त्तिः as the original text reading in B.

[23] B(73). [24] C(25). [25] जगती° A(22b). [26] °वि° D(23b).

अखेदसरलो[105] दाता निर्व्याजसुकृतो भवान् ।
अत एव विशेषेण[106] माननीयो मनीषिणाम् ॥ ४८ ॥

पद्मोदरसमुद्भूता[107] कन्या कमललोचना ।
होमावशेषपयसा[108] [109]-वर्धितियं मयाश्रमे-[109] ॥ ४९ ॥

[27]गृह्यतामग्रमहिषी सपत्नी[110] भवता भुवः[111] ।
विष्णोः[112] श्रीरिव योग्येयं तवैव पुरुषोत्तम ॥ ५० ॥

यज्ञपुण्यफलं[28] पूर्णं[113] कालेन मम दास्यसि ।
इत्युक्त्वा[29] विधिना राज्ञे कन्यां[114] दत्वा ययौ मुनिः ॥ ५१ ॥

प्रियां पद्मावतीं[115] राजा रतिं प्राप्येव मन्मथः ।
अरंस्त रुचिरोद्याने सुकृते पुण्यवानिव ॥ ५२ ॥

ततः कालेन[116] सा पुत्रं वंशवल्लीव मौक्तिकम् ।
असूत पद्मचूडाख्यं[117] गुणानां दर्पणं पितुः[118] ॥ ५३ ॥

शक्रादिभिर्लोकपालैरनुल्लङ्घ्यमहोदयः[119] ।
संस्तूयमानचरितः[120] स्वयं कमलजन्मना ॥ ५४ ॥

---

105 °शरलो B only. 106 ए in °षे° illegible in A. 107 With B,°दारस° AD. 108 With B, °शेषयसा AD. 109 With B, वर्धितियम्म याश्रमे AD. 110 Em., पत्नी AD, पत्नीत्वे B. 111 नृप B. 112 With B, विष्णः AD. 113 With B, पूर्णा AD. 114 With B, कन्या AD. 115 पद्मव° D. 116 कालन A. 117 With B, °डाख्य AD. 118 वितुः D. 119 With em. B, °लेरनुलंघ्य° AD. 120 With B, °चरित AD.

[27] B(75). [28] °पुण्यफ° A(23a). [29] इ° D(24a).

यशःसौरभसंभारसंपूरितदिगन्तरः ।
सर्वार्थिसार्थकल्याणकलनाकल्पपादपः[121] ॥ ५५ ॥

स्मृत्वा मुनेर्वचः काले कर्तुं[122] विपुलदक्षिणम्[123] ।
अहिंसावसुसंपूर्णमाजहार[124] महीपतिः ॥ ५६ ॥

[30]तस्मिन् यज्ञे समाजग्मुः सर्वकामैर्निरर्गले[31],[125] ।
मुनयो भार्गवमुखा नृपा दुष्प्रसहादयः[126] ॥ ५७ ॥

[32]वर्तमाने मखे तस्मिन् निःसंख्यवसुवर्षिणि ।
रक्षोरूपः[127] समुत्तस्थौ[128] वह्निमध्यात् सुरेश्वरः ॥ ५८ ॥

[33]उपसृत्य स भूपालं कृशो विकृतविग्रहः ।
क्षुत्पिपासार्दितो[129] ऽस्मीति ययाचे पानभोजनम् ॥ ५९ ॥

शासनादथ भूभर्तुस्तस्मै विविधभोजनम् ।
उपनिन्युः परिचिताः पानं च परिचारकाः ॥ ६० ॥

ततः किंचिद्विहस्यैव क्षितिपं प्राह[130] राक्षसः ।
नेदमस्मत्प्रियं राजन् वयं हि पिशिताशनाः ॥ ६१ ॥

---

121 सर्वार्थि with s.a. B and em. C, सर्वार्थ° ABD. कल्पपा with B, °कल्वपा° AD. 122 Em. कर्तुं ABD. 123 °क्षिणाम् B. 124 °संपूर्णमा° B. 125 Em., °मैर्विरर्गले AD, °मैरनर्गले em. B.
126 °दुष्प्रस° A. 127 With B, रक्षरूप AD. 128 With B, °स्थो AD. 129 With B, °सर्दितो AD.
130 With B, स्राह A, सह D.

[30] A(23b). [31] °मैर्नि° D(24b). [32] B(77). [33] C(26).

सद्योहतस्य मांसेन रुधिरेण[131] च भूयसा[132] ।
तृप्तिरुत्पद्यते ऽस्माकं दीयतां यदभीप्सितम्[133] ॥ ६२ ॥

सर्वकामप्रदो ऽसीति [34]त्वामहं समुपागतः ।
ददामीति [35]प्रतिश्रुत्य[134] न निषेधस्तवोचितः ॥ ६३ ॥

इति रक्षोवचः[135] श्रुत्वा करुणाकुलितो[136] नृपः ।
अहिंसानियमेनाभूदर्थिवैमुख्यदुःखितः ॥ ६४ ॥

[137]-अहो सो ऽचिन्तयद्दैवाज्जातो-[137] ऽयं धर्मसंशयः[138] ।
न सहे[139] दुःसहां हिंसां न च[140] नैष्फल्यमर्थिनः ॥ ६५ ॥

[36],[141]-न मांसं-[141] शरीरेभ्यो लभ्यते वैशसं[142] विना[143] ।
नाहं[144] पिपीलकस्यापि[145] [146]-कायक्लेशलवं सहे-[146] ॥ ६६ ॥

दत्वाहं सर्वभूतेभ्यः पुण्यामभयदक्षिणाम् ।
कथमस्मै प्रयच्छामि[147] मांसं प्राणिवधोद्भवम् ॥ ६७ ॥

इति संचित्य नृपतिस्तमूचे करुणाकुलः ।
स्वशरीरसमुत्कृत्तमसृङ्मांसं[148] ददामि ते ॥ ६८ ॥

---

131 ए in °रे° illegible in A. 132 With B, भूयसा AD. 133 With B, °भीप्सितं AD. 134 °शुत्य A. 135 With B, °वच AD. 136 With B, cf. T, °कूणितो AD. 137 Em., सो चिन्तयदेवाज्जतो A, सो ऽचिन्तयत्तदा दैवाज्जतो em. B, अहो सो चिन्तयदेवाज्जतो D. 138 With B, °संशयाः AD. 139 With B, पहे AD. 140 Omitted in C. 141 *Pāda* a has one syllable missing. न च मांसं B. 142 With s.a. B and em. C, cf. T, वैगसं AD, वैगमं B. 143 With B, विनाना A, पिनाना D. 144 With B, cf. T, हं AD. 145 With B, °कास्या° AD. 146 कायक्लेश अल्प निःसहे D. 147 With B, °च्छमि AD. 148 With B, °मप्रिंमांसं AD.

[34] A(24a). [35] D(25a). [36] B(79).

इत्युक्ते भूमिपतिना[149] बभूवाकुलितं[37],[150] जगत् ।
न च [38]देहव्ययोत्साहं सचिवास्तस्य[151] सेहिरे ॥ ६६ ॥

प्रणयाद्वार्यमाणोऽपि[152] भूपालैर्मुनिभिस्तथा ।
ददौ स्वदेहमुत्कृत्य[153] तस्मै मांसमसृग्वसाम्[154] ॥ ७० ॥

आकण्ठं पीतरक्तेन राक्षसेन क्षितिप्रभोः ।
भक्ष्यमाणेषु मांसेषु क्षणं[155] क्षितिरकम्पत ॥ ७१ ॥

ततः पद्मावती[156] देवी पतिं दृष्ट्वा तथागतम् ।
विलपन्ती विपतिता मोहमूर्च्छाकुलाभवत् ॥ ७२ ॥

मनुजेन्द्रस्य [157-]देवेन्द्रस्तत्र दृष्ट्वा[-157] सत्त्वमूर्जितम् ।
रक्षोरूपं परित्यज्य तमुवाच कृताञ्जलिः ॥ ७३ ॥

[39]अहो नु कर्मणा[158] राजन् दुष्करेण तवामुना ।
रोमाञ्चकञ्चुकाकीर्णः कायः कस्य न जायते ॥ ७४ ॥

अहो पुण्यमसामान्यमहो सत्त्वमनुत्तरम्[159] ।
अहो धैर्यममर्यादं[40] राजन् विरजसस्तव ॥ ७५ ॥

---

149 With B, °पतिन AD. 150 °पाकु° D. 151 With B, पचिवा° AD. 152 With B, °मानो AD. 153 With B, °मुत्कृत्य A, °मुत्करत्य D. 154 With B, °सृग्वसं AD. 155 With B, cf. T, रक्षनं AD. 156 With B, पद्मवती AD. 157 देवेन्द्रस् with B, देवेन्द्रास् AD. *Pāda* b has one extra syllable. देवेन्द्रस्तद्दृष्ट्वा s.em. with B, m.c., cf. T. 158 र् illegible in D. 159 With B, °नुतरं AD.

[37] °कुलि° A(24b). [38] D(25b). [39][B(81); C(27). [40] धैर्यम° A(25a) and D(26a).

दु:खिता:[160] परदु:खेषु निर्लोभा दुर्लभेषु च ।
विपक्षेषु क्षमावन्त: सन्त:[161] सुकृतसेतव:[162] ॥ ७६ ॥

समुन्मिषति को ऽप्येष[163] सत्त्वोत्साहो[164] महात्मनाम् ।
त्रैलोक्यं करुणार्द्राणां[165] येन यात्यनुकम्प्यताम्[166] ॥ ७७ ॥

उक्त्वेति[167] दिव्यौषधिभिस्तं कृत्वा स्वस्थविग्रहम् ।
प्रसाद्य लज्जावनत: शक्र: स्वनिलयं ययौ ॥ ७८ ॥

तत: समाप्ते विधिवद्यज्ञे राज्ञां महीपति: ।
चक्रे मुनिवराणाञ्च पूजां त्रिदशपूजित: ॥ ७९ ॥

स रत्नवर्षैर्यज्ञान्ते[168] कन्याग्रामपुरप्रद:[169] ।
सहितं त्रिदशार्हेण[170] हरिणा हेममालिना ॥ ८० ॥

ददौ राजगजं ब्रह्मरथाख्याय पुरोधसे[41] ।
योजनानां शतं तूर्णमेकेनाह्ना[42],[171] प्रयाति[172] य: ॥ ८१ ॥

[43]तस्मै समर्पितं[173] दृष्ट्वा[174] राज्ञा भद्रगिरिं गजम् ।
अभूद्दुष्प्रसहो राजा तत्स्पृहाकृष्टमानस:[175] ॥ ८२ ॥

---

160 With B, °खित: AD. 161 With B, पन्त: AD. 162 With B, °पेतव: AD. 163 प्यष A.
164 With B, सत्वत्पाहो A, सत्वोत्साहो D. 165 With B, °द्रणां AD. 166 °कम्पताम् B, °कम्प्यताम् s.a. B and em. C. 167 With B, उक्तेति AD. 168 °ज्ञान्तो D. 169 With B, °पूर° AD. 170 With B, °शार्हेन AD. 171 तूर्ण एकेना° s.a. B and em. C. न् in °ह्ना illegible in D. 172 व्रया° D.
173 With B, समर्पिति AD. 174 With B, दृष्टा AD. 175 With B, ततस्प्रिहा° A, ततस्त्रिहा° D.

[41] पुरोध° A(25b). [42] तूर्ण° D(26b). [43] B(83).

प्रयातेष्वथ[176] भूपेषु विस्मितेषु[177] मखश्रिया[178] ।
समर्पिते[179] यज्ञफले भार्गवाय महीभुजा ॥ ८३ ॥

तमुवाच समभ्येत्य स्वस्तिवादपुरःसरम्[180] ।
मरीचिशिष्यो वाहीकः प्राप्तपूजासनो मुनिः ॥ ८४ ॥

राजन्नध्ययनस्यान्ते गुरुर्मे गुरुदक्षिणाम् ।
ईहते परिचर्यार्थी सामान्यजनदुर्लभाम्[181] ॥ ८५ ॥

एकस्त्वमेव विधिना निर्मितो[182] दुर्लभप्रदः ।
बहवो जातु जायन्ते न लोके कल्पपादपाः[183] ॥ ८६ ॥

देवी[184] पद्मावती[185] पुत्रसहिता[186] गुरवे मम ।
तपःकृशाय[187] वृद्धाय[188] दीयतां[44] परिचारिका[189] ॥ ८७ ॥

इत्युक्ते मुनिना राजा [45]दयितावियोगजाम् ।
रुजं संस्तभ्य मनसा तमूचे धैर्यभूधरः ॥ ८८ ॥

[46]प्रयच्छामि मुने तुभ्यमीप्सितां[190] गुरुदक्षिणाम् ।
सहितां युवराजेन जीविताभ्यधिकां प्रियाम् ॥ ८९ ॥

---

176 व्रया° D. 177 With B, °तेखु AD. 178 With B, °श्रीया AD. 179 With B, °पिति AD. 180 With B, पुरःपरं A, °वुरःपरं D. 181 With B, °दुर्लभा AD. 182 नर्मितो A. 183 With B, °पादपा AD. 184 With B, देवि AD. 185 With B, °वति AD. 186 With B, °पहित A, सहित D. 187 With B, °कृशय AD. 188 With B, वृद्धय AD. 189 With B, °रिकां AD. 190 With B, तुभ्यं मिप्सितां AD.

[44] दीय° A(26a). [45] D(27a). [46] C(28).

[47]इत्युक्त्वा[191] ससुतां तस्मै ददौ पद्मावतीं नृपः ।
स्वजीविते [192]-ऽपि निःस्नेहस्त्यागः-[192] सत्त्वमयात्मनाम् ॥ ६० ॥

आदाय राजदयितां[193] विरहक्लेशकातराम्[194] ।
सपुत्रामाश्रमं[195] गत्वा प्रददौ गुरवे मुनिः ॥ ६१ ॥

अत्रान्तरे दुष्प्रसहः कुरुराजः क्षितीश्वरम् ।
दृप्तो ययाचे[196] दूतेन भूत्यै भद्रगिरिं[197] गजम् ॥ ६२ ॥

पुरोहितार्पितं[198] राजा[199] न ददौ द्विरदं यदा ।
तदा विपुलसैन्येन स्वयं योद्धुं[200] समाययौ ॥ ६३ ॥

[48]बलिना कुरुराजेन [201]-रुद्धेषु पुरवर्त्मसु-[201] ।
[49]बभूव भूमिपालस्य[202] सैन्यं[203] रणरसोद्भटम्[204] ॥ ६४ ॥

स वीरकुञ्जरहरिः शक्तो ऽप्यरिविदारणे[205] ।
जनक्षयभयोद्विग्नः कारुण्यात् समचिन्तयत् ॥ ६५ ॥

अहो ऽनुकूलमित्रं मे[206] राजा दुष्प्रसहः परम् ।
मातङ्गलोभमोहेन[207] सहसा शत्रुतां[208] गतः ॥ ६६ ॥

---

191 With B, °युक्त्व AD. 192 ऽपि निःस्नेह° em., पि निस्नेह° AD, विनिस्नेह° B. त्यागः with B, °त्यागं AD. 193 With B, °दायि° AD. 194 ए illegible in A. 195 °श्रमां D. 196 With B, पयाचे AD. 197 With B, °गिरि AD. 198 With B, °तार्प्पितं A, तार्व्यितं D. 199 With B, राज AD. 200 With B, योद्धु AD. 201 With B, रुद्धे पुरषुवर्त्मसु AD. 202 With B, °पलास्य AD. 203 With B, सैन्या AD. 204 With B, °सोद्धटं AD. 205 With B, स्यरि° AD. 206 म A. 207 मतङ्ग° B only. 208 With B, शत्रुत्रं AD.

[47] B(85). [48] A(26b). [49] D(27b).

स्नेहान्ताः सुजनैः स्नेहा निःस्नेहान्ताश्च[209] मध्यमैः ।
दुर्जनैर्घोरवैरान्ता[210] भवन्ति प्राणहारिणः ॥ ९७ ॥

[50]अहो विभवलोभेन क्षणक्षयिणि[211] जीविते ।
समुद्यमो ऽयमस्माकं परप्राणनिपातने ॥ ९८ ॥

हिंसायासप्रशान्तानां[212] सक्तानां[213] कलिकर्मसु ।
रणरक्ताभिषिक्तानां[214] भक्तार्थो[215] [51]ऽयं समुद्यमः ॥ ९९ ॥

सेवाविक्रीतजीवानां तुण्डपिण्डार्थिनामयम्[216] ।
कलहो दुःसहः[52],[217] क्रौर्यपिशुनानां शुनामिव[218] ॥ १०० ॥

अहो विभवलुब्धानां[219] परसंतापशीतलाः ।
स्वसुखायैव[220] धावन्ति नृशंसचरिता[221] धियः ॥ १०१ ॥

ये युद्धिसिद्धिसंनद्धा[222] रक्तान्तां[223] भुञ्जते[224] श्रियम् ।
कुतः क्रूरतरे[225] तेषां हृदये[226] करुणाकणः[227] ॥ १०२ ॥

एष दुष्प्रसहो राजा लुब्धो विभवमोहितः ।
न वध्यः सापराधो ऽपि करुणायतनं[228] मम ॥ १०३ ॥

---

209 With B, निस्नेहा° AD. 210 With B, °रावैरातां AD. 211 With B, °यिनि AD. 212 Em., हिंसयापप्रसान्तानां AD, हिंसयापप्रशान्तनां B. 213 With s.a. B and em. C, शक्तानां ABD. 214 With B, °तानं AD. 215 With B, भक्तर्थो AD. 216 तुण्ड em., cf. T, चण्ड° ABD. नामयम् with B, °नमयं AD. 217 With B, दःसहः AD. 218 With B, शुनमिव AD. 219 With B, °लुपधा° A, °लुपधी° D. 220 With B, °खयैव AD. 221 With B, °रितो AD. 222 युधि सिद्धि° B. 223 With B, °न्तं AD. 224 With B, भून्जते AD. 225 With B, क्रूरतारे AD, क्रुरतरे C. 226 हृदय D. 227 With B, कारुणकणः AD. 228 Em., कारुणायतनं A, कारुण्यायतनं B, कारुणायतनि D.

[50] B(87). [51] A(27a). [52] दुःस° D(28a).

[53]इति चिन्तयतस्तस्य कारुण्यात् काननैषिणः ।
प्रत्येकबुद्धाश्चत्वारः[229] स्वयं व्योम्ना समाययुः ॥ १०४ ॥

प्राप्तपूजासनाः[230] श्रुत्वा सर्वज्ञास्तत्समीहितम्[231] ।
राज्ञः प्रशमशीलस्य [54]प्रसन्नास्तत्त्वमूचिरे ॥ १०५ ॥

[55]संमोहपटलान्धेषु संसारिषु[232] दयालुता ।
शोभते तव भूपाल[233] सत्त्वलोकविवेकिनः[234] ॥ १०६ ॥

[56]क्रियतामीप्सितं[235] राजन् बोधौ बुद्धिर्निधीयताम् ।
संप्रति प्रतिरोधे ऽस्मिन् [236-]वनमेव विगाह्यताम्[-236] ॥ १०७ ॥

स्मेरनिर्झरझङ्कारकीर्णसंतोषसीकराः[237] ।
विविक्तकाननोद्देशाः[238] शमिनामेव[239] वल्लभाः ॥ १०८ ॥

इत्युक्त्वानुग्रहधिया विधायास्य[240] वियद्गतिम् ।
प्रभाप्रसाधितदिशस्ते तेन[241] सहिता ययुः ॥ १०९ ॥

यातेषु स्वपदं तेषु हिमवत्तटकाननम् ।
संप्राप्य पृथिवीपालः प्रसन्नप्रशमो[242] ऽभवत् ॥ ११० ॥

---

229 With B, °त्वरः AD. 230 With B, °पनाः A, °स्सनाः D. 231 With B, सर्वज्ञस्त° AD.
232 With B, °रेषु AD. 233 भूपील D. 234 सत्त्वालोके s.em., cf. T. 235 With B, °मीप्सीतं AD.
236 वनमवि° AB, वनमेव वि° s.a. B and em. C. 237 स्मेर em., स्मैर° AD, स्वैर° B. °शीकराः
B. 238 With B, °नोद्धेश AD. 239 With B, °नमेव AD. 240 With B, °धया° AD. 241 तन A.
242 Em., cf. T, प्रयन्नप्र° AD, प्रयतः प्र° B, प्रयतप्र° C.

[53] C(29). [54] A(27b). [55] B(89). [56] D(28b).

विवेकविमलास्तस्य[243] धियः सत्त्ववतामिव ।
[244]बभुः [सुखवृषाः][245] पूर्णनिर्वाण्यो वनभूमयः ॥ ११११ ॥

भूधरान्तरिते[57] तस्मिन् सहसा भूपभास्वति ।
शुशुचुर्मोहतिमिरप्राप्तशोकप्रजाः[246] प्रजाः ॥ ११२ ॥

ततस्तत्सचिवा[58] [247]-गत्वा मरीचिं-[247] मुनिमाश्रमे ।
शक्तं राज्यस्य रक्षायै राजपुत्रं ययाचिरे ॥ ११३ ॥

[59]मुनिना निर्विकारेण दत्तमादाय मन्त्रिणः ।
राजसूनुं[248] स्वनगरे चक्रुः सैन्यसमुद्यमम् ॥ ११४ ॥

ततः सैन्यसमुत्साह[249] इव राजवरात्मजः ।
सुभटाग्रेसरः प्राप[250] कुरुराजं रणाजिरे[251] ॥ ११५ ॥

स तेन हतविध्वस्तभग्नस्यन्दनकुञ्जरः[252] ।
पलायनपरित्राणः प्रययौ हस्तिनापुरम्[253] ॥ ११६ ॥

---

243 With B, •मलस्त• AD. 244 AD add, cf. also B, p. 88: *bar*[1] *'dir dga' ba'i char gyi skad dod*[2] *yig 'bru gsum chad pa ma dpe*[3] *rnams las ma rned pa pri ya ni zhes pa 'di dar los gsar du bcug* [4]-*brgya dpe rnyed na dpyad*-[4]. 1 *par* A. 2 *dong* D. 3 *dpa* A. 4 *brgya dpa rngad na dbyad* A. Omitted in B. *brgya dpe rnyed na dbyad* D. [Between here, the three equivalent missing (Sanskrit) syllables for *dga' ba'i char* are not found in the original manuscripts. 'Dar-lo newly inserted "*priya ni*". If an Indian manuscript is found, compare (them).] The syllables प्रियनि, supposedly recomposed by 'Dar-lo, are corrupt. 245 Tentative reconstruction on the basis of T. The original Sanskrit for the first three syllables was lost. प्रियनिवुः ABD. 246 With B, शुशुवुः AD. 247 गत्वा em., गके AD, जग्मुर् B. मरीचिं with B, मरीचे AD. 248 With B, •सुनुं AD. 249 With B, स्यैन्य• AD. 250 With B, प्रापुः AD. 251 •जिर A. 252 •स्तभङ्ग• B only. स्यन्दन with B, •सन्दन• AD. 253 With B, m.c., हस्तिनपुः AD.

[57] भूध• A(28a). [58] ततस्तत् D(29a). [59] B(91).

बलिना राजपुत्रेण जिते दुष्प्रसहे[254] युधि ।
मन्त्रिभिस्तद्भुजन्यस्ता भूमि:[255] शेषधृतिं ययौ[256] ॥ ११७ ॥

राज्ञो[257] दुष्प्रसहस्याथ[60] कालेन कलुषात्मन: ।
बभूवावृष्टिदुर्भिक्षमरकोपप्लव:[258] पुरे ॥ ११८ ॥

[61]स विचिन्त्यानुतापार्तस्तीव्रां[259] जनपदापदम्[62] ।
न विवेद परित्राणं विफलस्वस्तिकक्रिय:[260] ॥ ११९ ॥

पृष्टा विपत्प्रतीकारं तेनामात्यास्तमूचिरे ।
दु:सहो ऽयं महाराज जनव्यसनोद्भव:[261] ॥ १२० ॥

मणिचूडस्य भूभर्तुर्यदि चौडमणि:[262] प्रभो ।
लभ्यते स सुधास्यन्दी तेनेयं तीर्यते विपत् ॥ १२१ ॥

[63]चारेभ्य: श्रुतमस्माभि: स राजा[263] हिमवत्तटे ।
स्थित: [264]-संसारवैमुख्यो विवेकविमलाशय:-[264] ॥ १२२ ॥

अर्थित: स ददात्येव विश्वचिन्तामणिर्मणिम् ।
पुत्रदारशरीरादि नादेयं[265] तस्य किंचन ॥ १२३ ॥

---

254 दुष्प्र° D. 255 With B, भूमिन AD. 256 With B, ययो AD. 257 With B, राज्ञे AD. 258 With s.a. B and em. C, बभूव वृष्टि° ABD. 259 With B, °यनुता° AD. 260 With B, °स्तिक: क्रिय: AD. 261 *Pāda* d has one syllable missing. प्रजानां व्यसनोद्भव: B, जनव्यसनसंभव: s.em., m.c., cf. T. 262 चूडा° B. 263 With B, राज AD. 264 °मुख्यविवे° s.a. B and em. C. 265 With s.a. B and em. C, न देयं ABD.

[60] दुष्प्र° A(28b). [61] C(30). [62] जन° D(29b). [63] B(93).

इति मन्त्रिवचः श्रुत्वा तथेत्याधार्य[266] चेतसि ।
स द्विजान् मणियाच्ञायै[64],[267] विससर्ज तदन्तिकम् ॥ १२४ ॥

अस्मिन्नवसरे राजा मणिचूडश्चरन्[268] वने ।
मरीचेराश्रमोपान्तमवाप [65]विपुलं मुनेः ॥ १२५ ॥

देवी[269] पद्मावती तत्र फलमूलाधृतिव्रता[270] ।
व्रजन्ती[271] विजने भीता विपिने[272] मुनिशासनात्[273] ॥ १२६ ॥

शबरैर्मृगयायातैर्दृष्टा[274] कष्टदशां श्रिता[275] ।
जिघृक्षुभिः[276] कम्पमाना चुक्रोश करुणस्वरम् ॥ १२७ ॥

आकर्ण्य करुणाक्रन्दं कुरलीकूजितोपमम्[277] ।
हा राजन् मणिचूडेति त्रायस्वेति[278] सुदुःसहम्[279] ॥ १२८ ॥

सहसाभिद्रुतः[280] कान्तां ददर्श नृपतिर्निजाम्[281] ।
राहुसंत्रासितस्येन्दोर्द्युतिं निपतितामिव ॥ १२९ ॥

[66]वीतरागाङ्गवसनां निरञ्जनपरिग्रहाम्[282] ।
[67]वदन्तीमिव[283] संभोगसंयोगानामनित्यताम्[284] ॥ १३० ॥

---

266 With s.a. B and em. C, °त्यरधार्य AD, °त्यवधार्य B. 267 With B, °यज्ञायै AD. 268 °श्चरेन D. 269 दिवी A. 270 °मूल° B, धृति with B, °ध्रिति° AD, °धृत° C. 271 प्रज° D. 272 With B, विपेने D. 273 With B, मुने° AD. 274 शबरै with B, सबरै° AD. तैर्दृष्टां C, तैर्दृष्टा D. 275 With B, शृता AD. 276 °क्षुधिः D. 277 कुररी° C. 278 With B, त्रय° AD. 279 With em. B, रदुः°AD. 280 With em. B, °साभिद्रुत AD. Editor notes °साभद्रुत as the original text reading in B.
281 त्रिप° A. 282 With B, °ग्रहं AD. 283 With B, °मिवं AD. 284 With B, °नाममीत्य° A, °नामनीत्य° D.

[64] मणि° A(29a). [65] D(30a). [66] B(95). [67] A(29b).

तां राजहंससुगतां विहारस्तनमण्डलाम्[285] ।
[68]अश्रुकाषायनयनां[286] विलोक्य करुणावनीम् ॥ १३१ ॥

संसारचरिताश्चर्यविचारेष्वपि[287] कर्कशम् ।
कृपाकृपाणीनिर्लूनमिवासीद्[288] भूपतेर्मनः ॥ १३२ ॥

एकाकिनं[289] वने देवी विगतच्छत्रचामरम् ।
दृष्ट्वा नाथमनाथैव[290] लोकनाथं[291] तथागतम् ॥ १३३ ॥

[69]तद्वियोगविषाक्रान्ता तद्दर्शनरसाकुला ।
शोकहर्षसमाकीर्णा बभूव भृशविह्वला[292] ॥ १३४ ॥

शमीताः[293] शबरा[294] राज्ञा[295] शापभीताः[296] प्रदुद्रुवुः[297] ।
न नामाभ्युदये[298] भानोर्दृष्टं सप्रतिभं तमः ॥ १३५ ॥

अत्रान्तरे शमद्वेषी सर्वभूताशयाशयः ।
[70]मारः पुरुषरूपेण समेत्य नृपमब्रवीत्[299] ॥ १३६ ॥

राजन्[300] राजीवनयनां[301] प्रियां प्रणयिनीमिमाम्[71],[302] ।
न त्यक्तुमर्हस्यजने वने वनजलोचन ॥ १३७ ॥

---

285 •माण्ड• D. 286 With B, •नयनं A, नायनं D. 287 With B, •विचरे• AD. 288 With B, or •मिवाभूद्, •मिव AD. 289 एकाकीनं B. 290 With B, •नाथ्यैव AD. •नाथेव s.em., cf. T.
291 मौक• A. 292 •ह्वोला D. 293 Em., cf. T, सानीताः AD, सा नीता B. 294 With B, सबरा AD.
295 With B, राज्ञ AD. 296 With B, •भीत AD. 297 With B, •द्रुशुः AD. 298 With B, •मभ्यु• AD. 299 With B, cf. T, •मश्रपीद A, •मश्रवीत D. 300 राजान् D. 301 दीजी• D.
302 •णीमि• B.

[68] D(30b). [69] C(31). [70] A(30a). [71] •नीमि• D(31a).

[72]इयं हि ते मनोवृत्तिरिव[303] निःसुखतां[304] गता ।
वर्जिता राज्यभोगेन राजराज न राजते ॥ १३८ ॥

एतदाकर्ण्य नृपतिस्तं[305] विज्ञाय मनोभुवम्[306] ।
अन्तरायं विवेकस्य प्रत्यभाषत[307] सस्मितः ॥ १३९ ॥

जानामि त्वामहं[308] काममकामं शमसंयमे ।
संतोषवञ्छां[309] को नाम[310] भवता न विमोहितः ॥ १४० ॥

इतिवादिनि भूपाले[311] सहसान्तरिते[312] स्मरे ।
बभूव विक्लवा देवी तप्ता विरहवह्निना[313] ॥ १४१ ॥

दुःखितां तामदुःखाहाँ[314] पतिभोगवियोगिनीम्[315] ।
उवाचाश्वासयन्[73],[316] राजा जायां जितमनोभवः[317] ॥ १४२ ॥

देवि[318] धर्मक्रियायुक्ता[74],[319] न शोकं कर्तुमर्हसि ।
दुःखावसानी[320] विरसः[321] सर्वो[322] ऽयं सुखविभ्रमः[323] ॥ १४३ ॥

देहिनां दयितासङ्गास्तरङ्गतरलायुषाम् ।
लोलपद्मपलाशाग्रस्खलज्जललवाकुलाः[324] ॥ १४४ ॥

---

303 With s.a. B and em. C, °वृतिरिवि A, °वृत्तेरिव B, °वृतिरिव D. 304 न सुखतां B, निःसुखतां s.a. B and em. C. 305 °तिसं D. 306 Em., °भूव AD, °भवम् B. 307 °भाषित D. 308 With B, त्रामहं AD. 309 Em., cf. T, °वासं AD, °वतां B. 310 With B, नाप AD. 311 भूपले A. 312 With B, °रितै AD. 313 With B, °वह्निन्न AD. 314 Em., cf. T, तामर्हदुःखा AD, तामार्त्तदुःखां B. 315 °पियो° D. 316 With B, °श्वस° AD. 317 With B, °भव AD. 318 With C, देव AD, देवी B. 319 With B, °मकृययुक्ता AD. 320 With B, °खावपनि A, °खापपनि D. 321 पिरसः D. 322 With B, सर्व AD. 323 भोगवि° B. 324 With B, °जमलवा° AD. प in °पला° illegible in A.

[72] B(97). [73] उ° A(30b). [74] धर्मक्रि° D(31b).

इमा मुहूर्तनर्तक्य:[325] कालमेघतडिल्लता: ।
संसारसर्परसना[326] विलासचपला:[327] श्रिय: ॥ १४५ ॥

[75]भोगा:[328] क्षणेनैव[329] वियोगरोगा[330]
विभूतय: स्वप्नविवाहतुल्या:[331] ।
वाताहता दीपशिखा सुखश्रीर्[332]
उन्मत्तनृत्तं[333] भववृत्तमेतत् ॥ १४६ ॥

[76]सर्वोपजीव्या करुणा[334] न लक्ष्मी:[335]
सद्धर्म:[336] प्रकाश: सततं[337] न दीपा: ।
यशांसि रम्याणि[338] न यौवनानि
स्थिराणि[339] पुण्यानि न जीवितानि ॥ १४७ ॥

सत्यव्रतस्तामिति[340] [77]सान्त्वयित्वा[341]
विसृज्य जायां[342] निलये[78],[343] महर्षे: ।
चचार संसारपराङ्मुखानां
संतोषपुण्येषु तपोवनेषु ॥ १४८ ॥

---

325 With B, •नार्त• AD. 326 With B, •सर्प्पर• A, •सर्व्वर• D. 327 With B, •पला AD. 328 Em., भोग ABD. 329 With s.a. B and em. C, क्षणो नैव ABD. 330 •रोग: B. 331 स्वस्न: A. 332 With em. B, श्रीत् AD. 333 •नृत्यं B. Editor notes उन्मत्तनृत्यं as the original text reading in B.
334 With B, करुण AD. 335 With em. B, लक्ष्मी AD. 336 धर्म: s.em. with em. B, m.c.
337 With em. B, cf. T, सतन AD. 338 With B, •यानि AD. 339 •राण D. 340 •प्रत• D.
341 With B, सात्व• AD. 342 With B, जायं AD. 343 With s.a. B and em. C, निलयं ABD.

[75] B(99). [76] C(32). [77] A(31a). [78] निल• D(32a).

तदागतास्ते[344] त्वरया विसृष्टा:[345]
पञ्च द्विजा दुष्प्रसहेन राज्ञा ।
तमर्थिनामेकमकालबन्धुं
विशुद्धसत्त्वं[346] ददृशुर्वनान्ते[347] ॥ १४९ ॥

[79]ते स्वस्तिवादं[348] शनकैर्विधाय[349]
विशस्तधैर्या[350] इव साध्वसेन[351] ।
तमूचिरे सूचिततीव्रतापा[352]
दीर्घोष्णनिश्वाससमीरणेन[353] ॥ १५० ॥

राजन् पुरे दुष्प्रसहस्य राज्ञ:
क्रूरोपसर्गैर्हतशान्तवर्ग:[354]।
जन: कृत: कृत्तसमस्तकाम:[355]
प्रकाममार्तस्वनमात्रशेष: ॥ १५१ ॥

अशेषदोषप्रशमैकहेतुस्
त्रैलोक्यरक्षाप्रथितप्रभाव:[80],[356] ।
चूडामणिर्देव[81],[357] भवद्वितीर्ण:[358]
करोति तस्योपनिपातशान्तिम् ॥ १५२ ॥

---

344 With C, तथा° ABD. 345 With s.a. B and em. C, विमृष्टा: ABD. 346 With B, °सत्व AD. 347 With B, °नान्ति AD. 348 स्वस्त° D. 349 With B, सनकै° AD. 350 विश्वस्त° B, विशस्त° s.a. B and em. C. 351 With B, सध्व° AD. 352 °त्रापा A. 353 °णेन D. 354 With B, °सर्गैर्हत° AD. 355 With B, °समप्त° AD. 356 With B, °रक्षाप्र° AD. 357 With B, °दैव° AD. 358 With B, °द्विदीणा: A, °द्विदिणा: D.

[79] B(101). [80] त्रैलो° A(31b). [81] चूडाम° D(32b).

दयाजुषश्चन्दनपल्लवार्द्रा:[359]
स्वच्छाशयाश्चन्द्रमणिप्रकाशा:[360] ।
संतापकाले शरणं जनानां
भवद्विधा एव[361] भवे भवन्ति ॥ १५३ ॥

[82]इत्यर्थितस्तैरविलुप्तसत्त्व:[362]
संपूर्यमाण: करुणारसेन ।
उवाच संचिन्त्य जनोपतापं[363]
संक्रान्तमन्त: श्रुतिवर्त्मनेव ॥ १५४ ॥

[83]अहो स राजा[364] सहते कथं नु[365]
देवोपघातेन निपीडितानाम् ।
निर्दारितान्त:करणं[366] प्रजानां
वियोगदु:खोद्भवमार्तनादम् ॥ १५५ ॥

अयं मणिर्मस्तकमूलजन्मा[367]
निष्कृत्य[368] तूर्णं प्रतिगृह्यतां मे ।
धन्यो[369] ऽस्मि यद्यर्थिजनस्य[84],[370] दु:ख-
क्षये [85],[371]-क्षणं कारणतां-[371] व्रजामि ॥ १५६ ॥

---

359 दयायुष° B. पल्लवार्द्रा: with B, °पल्लवार्द्र: A, °पल्लवार्द्र: D. 360 With B, °प्रकाश: AD. 361 अव A. 362 With B, °लब्ध° AD. 363 °तासं A. 364 With B, राज AD. 365 With s.a. B and em. C, न ABD. 366 Em., निर्दरि° AD, निदारि° B, विदारि° C. 367 With B, मनिर्म्मास्त° A, मणिर्मास्त° D. 368 निष्कृत्य C. 369 With B, cf. T, धस्या AD. 370 यद्यर्थि° D. 371 क्षणका° B, क्षणं का° s.a. B and em. C.

[82] B(103). [83] C(33). [84] य° A(32a). [85] D(33a).

इत्युक्तमात्रे[372] वसुधाधिपेन
धराधराम्भोधिमहीधरित्री[373] ।
चिरं चकम्पे चकितेव तस्य
शिरस्तटोत्पाटनतीव्रदुःखात् ॥ १५७ ॥

[86]ततः कृपाकोमलचित्तवृत्तेस्[374]
[375-]ते तीक्ष्णशस्त्रैर्वचसा[-375] नृपस्य ।
सुतीक्ष्णशस्त्रादपि[376] तीक्ष्णचित्ताः[377]
स्वयं शिरः पाटयितुं प्रवृत्ताः[378] ॥ १५८ ॥

तद्दुष्करं[379] कर्म नरेश्वरस्य
व्योम्ना[380] विमानैर्नलिनासनाद्याः[381] ।
सुराः सविद्याधरसिद्धसाध्याः[382]
समाययुर्द्रष्टुमलुप्तसत्त्वम्[383] ॥ १५९ ॥

विपाट्यमाने शिरसि प्रसह्य[384]
रत्नप्रभाविभ्रममादधानैः ।
स रक्तपूरैरभिषिक्तकायः[385]
सेहे व्यथामर्थिसुखे प्रवृत्तः ॥ १६० ॥

---

372 °मत्रे A. 373 धरा with B, धार° AD. भोधि° with C, °बोधि° ABD. 374 वृत्तेस् with s.a. B and em. C, °वृत्तैस् ABD. 375 ते तीक्ष्ण em., m.c., cf. T, तीक्ष्ण° AD, सुतीक्ष्ण° B. 376 With B, °शत्रदपि AD. 377 Em., चित्तः ABD. 378 प्रवृत्तः B. 379 With B, तदुःकरं AD. 380 Em., cf. infra, 3.189b, व्योम्न AD, व्योम्नि B. 381 With B, °नाद्यः AD. 382 With B, °साध्यः AD. 383 °युर्दृ° D. 384 With B, स्रस° AD. 385 With B, cf. T, रक्षपू° AD.

[86] B(105).

विलोक्य तं सत्त्वनिबद्धधैर्यं[87],386
तीव्रव्यथावेगनिमीलिताक्षम्[88],387 ।
ययुर्विरामं388 न नृशंसवृत्तेर्389
विप्राः क्षणं राक्षसतामवाप्ताः ॥ १६१ ॥

[89]विचार्य390 राजा स्वशरीरदुःखं
संसारिणां क्लेशमयं391 शरीरम् ।
[90]एवंविधैर्दुःखसहस्रलक्षैर्392
आक्रान्तमित्यार्ततरो बभूव ॥ १६२ ॥

सो ऽचिन्तयद्देहनिबद्धरत्न-
दानेन393 यत्पुण्यफलं394 मयाप्तम्395 ।
तेनोग्रदुःखं कलयामि 396-मा भूद्
अपुण्यपाके-396 नरके नराणाम् ॥ १६३ ॥

समुद्धृते रक्तवसावसिक्ते397
तस्मिन्मणौ निश्चलतालुमूलात् ।
मूर्च्छाकुलो ऽपि प्रययौ398 399-स हर्षं-399
संपूरणेनार्थिमनोरथस्य400 ॥ १६४ ॥

---

386 •निपद्ध• D. धैर्यं with B, •धैर्य AD. ऐ illegible in A. 387 With B, •थवे• AD. 388 •रामां D. 389 नृशंस with B, नृशंप्र• AD. •वृत्तैर्• AB, •वृत्तेर्• s.a. B and em. C. 390 च् illegible in A. 391 •मायं D. 392 एवंपि D. 393 •यददेह• D. दानेन with B, m.c., •दाने AD. 394 प् illegible in A. 395 मयास्तं A. 396 With B, मा भूपुण्य• AD. 397 •वासा• D. 398 With B, त्रययौ AD. 399 Em., स हर्ष AD, सहर्षः B, स हषं s.a. B, सहर्षं C. 400 With s.a. B and em. C, •रथेन ABD.

[87] सत्त्व• A(32b). [88] ती• D(33b). [89] B(107). [90] C(34).

स कम्पमानाङ्गुलिपल्लवेन
दत्वा स्वहस्तेन मणिं द्विजेभ्यः ।
निमीलयन् संतमसेन[91] लोकं
पपात[92],401 तिग्मांशुरिवातिरक्तः:402 ॥ १६५ ॥

[93]अलुप्तसत्त्वे पतिते पृथिव्यां
तस्मिन् सुराणां सह पुष्पवर्षैः ।
मणिं समादाय ययुर्द्विजास्ते403
तूर्णं404 पुरं दुष्प्रसहस्य राज्ञः ॥ १६६ ॥

स तेन सद्यः:405 शमितोपसर्गः:406
स्वर्गोचितासादितभोगवर्गः:407 ।
तद् बोधिसत्त्वस्य समस्तसत्त्व-
संतारणार्हं408 प्रशशंस409 सत्त्वम् ॥ १६७ ॥

अत्रान्तरे किंचिदवाप्तसंज्ञं410
नरेश्वरं विश्रुतरत्नदानम्411 ।
समाययुर्भार्गवगौतमाद्या
मरीचिमुख्या412 मुनयो वनेभ्यः ॥ १६८ ॥

---

401 With B, पपत A, पत D. 402 With B, तिक्मां° AD. 403 With B, युर्द्धि° AD. 404 With B, रूर्णं AD. 405 With B, सद्य AD. 406 With B, समि° AD. 407 With B, सर्गो° AD. 408 With B, समप्त° AD. 409 With B, cf. T, प्रशं AD. 410 With B, °वास्तसंज्ञ A, °वाप्तसंज्ञ D. 411 विशुत° A. 412 With B, मरीचे° AD.

[91] °मसे° D(34a). [92] प° A(33a). [93] B(109).

मरीचिमेवानुगता[413] च देवी
पद्मावती वीक्ष्य परिक्षतं[414] तम् ।
संमोहवेगाभिहता पपात
क्षणं क्षितौ बाललतेव[415] लूना ॥ १६९ ॥

[94]दिगन्तसंचारिणि चारणानां
नभश्चराणां[416] [95]नृपसाधुवादे[96] ।
सराजपुत्राः सह मन्त्रिमुख्यैः
प्रजाः[417] प्रजानाथमथोपजग्मुः[418] ॥ १७० ॥

वीक्ष्य क्षितीशं क्षतजोक्षिताङ्गम्
अक्षीणसत्त्वं[419] पतितं पृथिव्याम् ।
पृथुव्यथाक्लेशजुषं[420] जनानाम्
अभूदभूतार्थविकल्पजल्पः[421] ॥ १७१ ॥

कुठारिकैः कैश्चिदहो दयार्द्रैः
सर्वार्थिसेव्यः[422] सरलः सुवृत्तः[423] ।
दुरात्मभिः स्वार्थलवाभियुक्तैश्[424]
छायातरुः[425] कष्टमयं निकृत्तः ॥ १७२ ॥

---

413 With B, मरीचमवानुगत A, मरीचेमेवानुगत D. 414 With B, cf. T, परिकातन् AD. 415 With B, बललतैव AD. 416 With B, नधस्वरा° A, नभस्वरा° D. 417 प्रजाः with B, cf. T, omitted in AD. 418 With B, °नथम°AD. °थोवज° D. 419 With B, °क्षिणस° AD. 420 युषं B. 421 °पिकल्प° A. 422 With B, °पेव्यः AD. 423 With B, सुवृतः AD. 424 °लयभि° D. 425 °छया° A.

[94] B(111); C(35). [95] D(34b). [96] नृ° A(33b).

अहो परार्थोज्झितजीवितो[426] ऽयं
परां[427] चमत्कारदशां प्रयातः ।
ससौरभश्छिन्नतनुर्नितान्तं[428]
भवत्युदारः[429] सहकार[430] एव ॥ १७३ ॥

[97]लुब्धस्य न स्वः स्वजनो ऽपि जन्तोर्
न कामकामस्य धने ऽनुरोधः ।
सर्वात्मना सत्त्वहितोद्यतस्य
देहो ऽपि न स्नेहपदं दयालोः ॥ १७४ ॥

येषां[431] कृते[432] दैन्यमयं[433] [98]प्रयाति
सर्वार्थनाशश्चार्थिजनो[434] ऽर्थिभावम्[435] ।
त एव दीनोद्धरणव्रतानां[436]
प्राणाः परित्राणपणे[437] तृणानि ॥ १७५ ॥

इति प्रवादे विविधानुभावे
विजृम्भमाणे[438] मुनिमण्डलस्य ।
भूपालमभ्येत्य सबाष्पचक्षुर्
मुनिर्मरीचिः[439] प्रणयादुवाच ॥ १७६ ॥

---

426 With B, cf. T, *थोज्ज्यत* AD. 427 With B, परं AD. 428 Em., cf. T, *तनुर्गितांतं AD, *तनुर्गतात्मा B. 429 With B, *दार AD. 430 With B, सहाकार AD. 431 With B, येषा AD. 432 With B, कृति AD. 433 With B, cf. T [AD only], न्यमयं AD. 434 सर्वात्मना चार्थिजनो B. 435 With B, *भारं AD. 436 *प्रतानां D. 437 *त्राणा* D. 438 With B, विज्रिम्भमाने AD. 439 With B, *रीचेः AD.

[97] B(113). [98] A(34a); D(35a).

अहो नु निष्कारणबन्धुभावम्
आलम्ब्य राजन् दयया जनस्य ।
प्रजापरित्राणविधानभूमिस्[440]
तनुस्त्वयेयं[441] तृणवद्वितीर्णा ॥ १७७ ॥

[99]क्षयः[442] प्रवृत्तो[443] निरपेक्षवृत्तेस्[444]
तवार्थिबन्धोर्निजजीविते[445] ऽपि ।
यदेष[446] कामं[447] कमलानिकायः
कायस्त्वयापायपदे नियुक्तः ॥ १७८ ॥

अप्यस्ति राजन् सुकृतव्रते ऽस्मिन्
फलस्पृहा प्राणपणे[448] ऽपि काचित् ।
अप्यर्थिहितोस्तव[449] तालुभेद-
खेदाद्विकारं[100] भजते[450] न चेतः ॥ १७९ ॥

इत्यद्भुताविष्कृतमानसेन
मुनीन्द्रमध्ये मुनिना स पृष्टः ।
उवाच संस्तभ्य[451] रुजं प्रयत्नाद्
रक्ताभिषिक्तं वदनं प्रमृत्य[452] ॥ १८० ॥

---

440 With B, °भूमि AD. 441 तनुस्तवेयं B. 442 With C, क्षयं ABD. 443 With B, प्रवृत्ता AD. 444 With B, °वृत्तिस् AD. 445 With B, °र्निजाजी° AD. 446 With B, °देश AD. 447 With B, काम AD. 448 With B, पाणा° AD. 449 Sc. er., cf. T, अस्यर्थि° AD, अस्यार्थि° B. 450 भजत D. 451 With C, संस्तृभ्य AD, संस्तम्भ्य B. 452 प्रम्रंज्य D.

[99] B(115); C(36). [100] °भेदखे° A(34b) and D(35b).

फलस्पृहा[453] नास्ति मुने ममान्या[454]
किं त्वेक एव प्रचुरो ऽभिलाष:[455] ।
यद्घोरसंसारनिमग्नजन्तु-
संतारणायैव[456] भवे भवेयम्[457] ॥ १८१ ॥

[101]अर्थिप्रिये देहविदारणे ऽस्मिन्
नैवास्ति मे को ऽपि विकारलेश: ।
यद्येष सत्य:[458] समयो मयोक्तस्[459]
तदस्तु स्वस्थमिदं[460] शरीरम् ॥ १८२ ॥

इत्युक्तमात्रे सहजानुभावे[461]
सत्त्वोचिते सत्यधनेन राज्ञा ।
अभूद्वपु:[462] सत्यबलेन तस्य
रूढव्रणं[463] तत्क्षणजातरत्नम् ॥ १८३ ॥

तत: सुरै: शक्रविरिञ्चिमुख्यैर्[464]
जातप्रहर्षैर्मुनिभिश्च[102] सर्वै: ।
[103]अभ्यर्थितो[465] ऽपि क्षितिपालनाय
भोगाभिलाषी[466] न बभूव भूप: ॥ १८४ ॥

---

453 With B, •स्पृह AD. 454 With B, •मान्य AD. 455 With B, •लास: AD. 456 With B, •संतरणा• AD. 457 ए illegible in A. 458 With B, सत्य AD. 459 With B, मयोक्तास् AD. 460 मिदं with B which reads मे स्वस्थे• . *Pāda* d has one syllable missing. 461 With B, •भवे AD. 462 With B, •वपु AD. 463 With B, रुढ• AD. 464 With B, •मुख्यै AD. 465 With B, •यार्थितो AD. 466 With B, •लासी AD.

[101] B(117). [102] •मुनि• A(35a). [103] D(36a).

अवाप्तसंज्ञा[467] मुनिना प्रमुक्ता[468]
पद्मावती राजसुतेन साकम्[469] ।
पतिं[470] ययाचे विरहोपशान्त्यै
सिंहासनाक्रान्तिसुखं[471] प्रजानाम्[472] ॥ १८५ ॥

[104]ततस्तमभ्येत्य कृपाकुलास्ते
प्रत्येकबुद्धा जगतो हिताय ।
देहप्रभापूरितदिग्विभागा
बभाषिरे[473] हर्षमिवोद्विरन्तः ॥ १८६ ॥

चिरादवाप्ते विरहावसाने
पुनः परित्यागदशामसह्याम्[474] ।
न राजपुत्रः सहते न देवी
दुःखानुबन्धो ह्यसकृन्निपातः[475] ॥ १८७ ॥

स्वमर्थिने यः प्रददाति देहम्
आपन्नदुःखप्रशमैकहेतुः ।
कथं स कुर्यात् स्वजने ऽप्युपेक्षां[476]
[105]धर्मो[477] ऽप्ययं यस्य परार्थ[106] एव ॥ १८८ ॥

---

467 With B, अवास्त° A, अपाप्त° D. 468 प्रयुक्ता C. 469 Em., सांकं AD, सार्धम् B. 470 With B, पति AD. 471 With B, °नकान्ति AD. 472 प्रजानं D. 473 °षिते D. 474 पारि° D. सह्याम् with B, cf. T, °सज्यां AD. 475 With B, °पकृ° AD. 476 With B, °पेक्षं AD. 477 With B, दर्म्म A, दर्म्मो D.

[104] B(119); C(37). [105] A(35b). [106] प° D(36b).

इत्युक्तमाकर्ण्य[478] नरेश्वरस्तैस्
तथेति[479] निश्चित्य धिया कथंचित्[480] ।
व्योम्ना विमानैः स्वपुरीमवाप्य[481]
भेजे[482] निजं राज्यपदं सपुत्रः[483] ॥ १८६ ॥

इति स विपुलसत्त्वः सत्यवान्[484] बोधिसत्त्वः[485]
सुचिरविहितराज्यः[486] [487]-सौगतं धाम-[487] भेजे[488] ।
जिनपुरमणिचैत्यच्छत्ररत्नप्रदीप-
प्रकटितविविधश्रीर्लक्षणाभ्यस्तबोधिः[489] ॥ १९० ॥

इत्याह भगवान् बुद्धः स्ववृत्तान्तनिदर्शनैः[490] ।
दानोपदेशे[491] भिक्षूणां सम्यक्संबोधिसिद्धये ॥ १९१ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां मणिचूडावदानं नाम तृतीयपल्लवः[107],[492] ॥

---

478 With B, °त्युक्तं मा° AD. 479 With B, °स्तेस्त° AD. 480 °चत A. 481 With B, °वास्य AD. 482 With B, भोजे AD. 483 With C, सपुत्राः AD, स्वपुत्रैः B. 484 With B, °वन AD. 485 पोधि° A. 486 With C, °पिहित° ABD. 487 With B, cf. T, सौगतान्वाम AD. 488 भोजे D. 489 With B, °मणिचेत्य° A, °मणिचोत्य° D. 490 °दर्शनैः A, °दर्शने B. 491 With B, °देश AD. 492 तृतीयः प° B.

[107] °तीय° D(37a).

[1][४. मान्धात्रवदानम्][1]

शोभन्ते भुवनेषु[2] भव्यमनसां[3] यन्नाककान्ताकर-
प्रोढोदञ्चितचारुचामरसितच्छत्रस्मिता:[4] संपदः ।
यच्चोत्सर्पति[5] तर्पितश्रुति यशः कर्पूरपूरोज्ज्वलं[6]
स्वल्पं[7] दानकणस्य[8] तत्फलमहो दानं निदानं[9] श्रियः ॥ १ ॥

अभूदुपोषधो नाम भूभृद्यस्य विभावत:[10] ।
विबुधाभिमता कीर्तिः सुधा दुग्धोदधेरिव ॥ २ ॥

वसुधामवतो यस्य वसुधामवतः पुरः ।
ननाम[11] प्रणतौ[12] कस्य न नाम नृपतेः शिरः ॥ ३ ॥

शुद्धा धीरिव धर्मेण दानेनेव दयालुता ।
विभूतिर्विनयेनेव भूषिता येन भूरभूत् ॥ ४ ॥

गुणिनः प्रांशुवंशस्य[13] बभूवेन्दुद्युते:[14] स्थितिः[15] ।
यस्य [2]सर्वातपत्रस्य[3] मूर्ध्नि सर्वमहीभृताम्[16] ॥ ५ ॥

[4]यस्येश्वरशिरःस्थायि शुभ्रं गङ्गाजलोज्ज्वलम् ।
भ्रमत्यदभ्रं[17] लोकेषु भुवनाभरणं यशः ॥ ६ ॥

---

1 B starts चतुर्थः पल्लवः । मान्धात्रवदानम् । C starts ४ मान्धात्रवदानम् । 2 With B, भूव° AD. 3 With B, °नसं AD. 4 यन्नाग° D. °प्रौढ° B. 5 With B, यच्छो° AD. 6 कर्वू° D. 7 With B, स्वल्प AD. 8 With B, °नाक° AD. 9 With B, °दान AD. 10 With B, °वते AD. 11 ननम D. 12 With B, °तो A, °त D. 13 With B, प्रंशु° A, प्रिशु° D. 14 °भूवन्दु° A. 15 With B, स्थितः AD. 16 With B, °भृतं AD. 17 भ्रमें° D.

[1] A(36a); B(123); C(38). [2] D(37b). [3] °तप° A(36b). [4] B(125).

कर्तुः क्रतुसहस्राणां सहस्राक्षाधिकश्रियः ।
यस्य षष्टिसहस्राणि[18] कलत्रं सुदृशामभूत् ॥ ७ ॥

कदाचिन्मुनिरक्षायै[19] रक्षःक्षयकृतक्षणः[20] ।
विचचाराश्वमारुह्य स तपोवनभूमिषु ॥ ८ ॥

तत्र राजर्षिभिः[21] कैश्चित्पुत्रेष्टिकलशं धृतम् ।
दूराध्वश्रमसंतप्तः स[22] पयः पूर्णमापपौ ॥ ९ ॥

विजनासादितं[23] पीत्वा[24] स मन्त्रकलशात् पयः[25] ।
राजधानीं समासाद्य गर्भं लेभे विभुर्भुवः[26] ॥ १० ॥

स्वप्नमायेन्द्रजालादि[27] यस्याः[28] कौतुकविप्रुषः ।
जयत्यद्भुतसंभारभूमिः सा भवितव्यता ॥ ११ ॥

[5]विधेर्विविधवैचित्र्यचित्रकर्मविधायिनः[6],[29] ।
आश्चर्यरेखाविन्यासं[30] कः परिच्छेत्तुमीश्वरः ॥ १२ ॥

कालेन[31] तस्य मूर्धानं भित्त्वा[32] [33]-बालोऽशुमानिव-[33] ।
रूढव्रणस्य सहसा दिव्यद्युतिरजायत[34] ॥ १३ ॥

---

18 With B, षष्ठि° AD. 19 With B, °रक्षयै AD. 20 With B, रक्षिक्ष° AD. 21 With B, राजार्षि° AD. 22 With B, प AD. 23 With B, °नसादि° AD. 24 With B, पित्वा AD. 25 वयः A. 26 With B, विभू° AD. 27 स्वस्न° A. 28 With B, यस्यः AD. 29 With C, °वैचित्य° AD, °वैचित्र° B. 30 With B, अश्च° AD. 31 कालन A. 32 With C, भित्वा ABD. 33 With B, बालो शू° AD. 34 With B, दिव्यं द्यु° AD.

[5] D(38a). [6] °विध° A(37a).

[7]तं राजजाया जगृहुर्जगत्साम्राज्यलक्षणम्[35]।
वात्सल्यप्रस्नुतकुचा:[36] पुण्यं मूर्तिमिवाश्रितम् ॥ १४ ॥

[8]मां धारयिष्यति शिशु: श्लाघ्यो ऽयं[37] जननीपदे ।
इति तासां मिथो वाक्यैर्मान्धाताभून्नृपात्मज:[38] ॥ १५ ॥

तस्य प्रवर्धमानस्य[39] बालक्रीडाविलासिन: ।
षडिन्द्र: प्रययौ काल:[40] पुण्यक्रीडाक्षयायुष: ॥ १६ ॥

नवयौवनमारूढ: सर्वविद्यासु पारग: ।
स याते पितरि स्वर्गं भेजे राज्यं[41] क्रमागतम् ॥ १७ ॥

यक्षो दिवौकसो नाम सुकृतेर्दासतां[9] गत: ।
अभिषेकोपकरणं दिव्यं तस्योपनीतवान् ॥ १८ ॥

स स्वर्णैर्बद्धमुकुट: कल्पितोष्णीषशेखर:[42] ।
शरदभ्रावतंसस्य[43] मेरो: शोभामवाप्तवान् ॥ १९ ॥

सप्त रत्नानि[44] तस्याथ प्रादुर्भूतानि तत्क्षणे ।
चक्राश्वमणिहस्तिस्त्रीगृहसेनाग्रगाण्यपि[45] ॥ २० ॥

---

35 साम्र° with em. B, °संम्रा° A, °सम्रा° D. लक्षणम् with C, °लक्षणि AD, °रक्षणे em. B. 36 स्नुत with em. B, °स्तुत° AD, °स्रुत° C. कुचा: em., cf. T, °करवा: AD, °क्षीरा em. B, °क्षीरा: C.
37 With B, य AD. 38 With B, °मान्जाता° AD. 39 With B, °माण° AD. 40 With B, काल AD.
41 With B, राज्य AD. 42 With B, °शेषर: AD. 43 With B, परदभ्रावतंपस्य A, सरदभ्रावतंपस्य D.
44 With B, °ननि AD. 45 With B, °गान्यपि AD.

[7] B(127). [8] C(39). [9] सु° D(38b). सुकृ° A(37b).

बभूव चास्य पुत्राणां[46] तुल्यरूपबलौजसाम् ।
सहस्रं विजितारातेर्भुजानामिव[47] भूभुजः ॥ २१ ॥

[10]वसुंधरां[48] समस्ताब्धिवेलाकलितमेखलाम्[49] ।
निखिलां विदधे दोष्णि शेषविश्रान्तिनिर्वृताम् ॥ २२ ॥

भुवनत्राणसंनद्धः[50] प्रत्यग्रकमलाश्रयः ।
चक्रवर्ती[51] स सुकृतैर्विष्णोः[52] कर इवाबभौ ॥ २३ ॥

त्रिजगज्जाह्नवी[53] कीर्तिः[54] प्रभावाभरणाः[55] श्रियः ।
[11]सो ऽयं [12]सुकृतवल्लीनां प्रथमः कुसुमोद्गमः ॥ २४ ॥

स कदाचिद्वनान्तेषु विकाशिकुसुमश्रियः[56] ।
रुचिराः[57] सचिवैः सार्धं विचचार विलोकयन् ॥ २५ ॥

ददर्श तत्र निष्पक्षान्[58] विहगान् पादचारिणः ।
व्योममार्गगतिं स्मृत्वा[59] प्रयातान् कृशतामिव ॥ २६ ॥

पक्षहीनानगतिकान् वृत्तिक्षीणान्निरम्बरान्[60] ।
दरिद्रानिव तान् वीक्ष्य प्रोवाच[61] कृपया[62] नृपः ॥ २७ ॥

---

46 पुर्वाणां D. 47 With C, °तेर्भूजाना° AD, °तेभूभुजा° B. 48 °धरी D. 49 With B, cf. T, समप्तादिपवेलाकालित° AD. 50 With C, cf. T, °भुवनातपसं° ABD. 51 With B, °वर्ति AD. 52 णोः with B, णो AD. सुकृतेर्वि° B. 53 With B, °जह्नवि AD. 54 With B, कीर्तेः AD. 55 With B, °रणा AD. 56 With B, °कासि° AD. 57 Em., रुचिरां AD, रुचिरं B. 58 With B, °क्षन AD. 59 With B, स्मृत्या AD. 60 With B, वृत्तिं क्षिणा° AD. 61 With B, °वच AD. 62 With B, कृपय AD.

[10] B(129). [11] D(39a). [12] A(38a).

अहो वराकैर्विहगै:[63] किमेतै:[64] कुकृतं कृतम् ।
यदेते पक्षविकला:[65] कृच्छ्राच्चरणचारिण:[66] ॥ २८ ॥

इत्युक्ते भूमिपतिना करुणाकुलितात्मना ।
पुर:स्थितो[67] महामात्य: सत्यसेनस्तमब्रवीत्[68] ॥ २९ ॥

[13]श्रुतमेतन्मया देव[69] कथ्यमानं[70] वनेचरै:[71] ।
कारणं पक्षपतने[72] यदभूत् पक्षिणामिह[14],[73] ॥ ३० ॥

[15]सन्ति पञ्च शतान्यत्र पुण्यधाम्नि तपोवने ।
तप:स्वाध्यायशक्तानां[74] मुनीनां दीप्ततेजसाम् ॥ ३१ ॥

तेषामध्ययनध्यानजपविघ्नविधायिन: ।
एते कोलाहलं चक्रु:[75] खगास्तरुवने[76] सदा ॥ ३२ ॥

तस्मै विहगसंघाय कर्णापायपरश्रुते[77] ।
अतिसंवर्धमानाय[78] चुकोप मुनिमण्डलम्[79] ॥ ३३ ॥

तदु-द्भूतमहाशापतापप्लोषेण[80] सर्वत: ।
क्षणेन पक्षिणां[81] पक्षा व्यशीर्यन्त[82] कृतागसाम्[83] ॥ ३४ ॥

---

63 With B, वाराकैविहागै: AD. 64 With B, किमि° AD. 65 वक्ष° A. 66 Em., m.c., cf. T, कृच्छच्चर° AD, कृच्छ्रचर° B. 67 With B, पुरस्थि° A, फुरस्थि° D. 68 सत्यस° D. तम with B, °थम° AD. 69 With B, दव AD. 70 With B, कत्यमानां AD. 71 With B, °चारे: AD. 72 With B, °पदने AD. 73 वक्षि° A. 74 °सक्तानां s.em. with C. 75 With B, चक्रु AD. 76 With B, खगस्° AD. 77 Em., कर्ण कायपरं श्रुते AD, कर्णज्वरकरे स्ते em. B, कर्णापायकृते परम् C. 78 With C, cf. T, अभिसंबद्ध° ABD. 79 With B, °मण्डल: AD. 80 With B, °प्लषेण A, °प्लषण D. 81 With B, °णा AD. 82 With B, °सीर्यन्त AD. 83 With B, °शसां AD.

[13] B(131). [14] पक्षि° A(38b); D(39b). [15] C(40).

त एते विहगाः पक्षरहिता:[84] कृच्छ्रवर्तिनः ।
त्वद्विपक्षा[85] इव वने श्रान्ताश्चरणचारिण:[86] ॥ ३५ ॥

महामात्येन कथितं निशम्यैतन्महीपति:[87] ।
उवाच करुणाक्रान्तस्तप्त:[88] शापेन पक्षिणाम् ॥ ३६ ॥

अहो तेजः परिणतं[89] [16]शान्तानामपि[17] कानने ।
अङ्गाराणां मुनीनाञ्च दहत्येवानिवारितम् ॥ ३७ ॥

[18]मिथ्यातपस्विभिः किं तैः स्वसुखाय[90] न यैः कृतः ।
मनस:[91] कोपतप्तस्य परिषेकः क्षमाम्बुभि:[92] ॥ ३८ ॥

प्रसन्ना धीर्मनो[93] मैत्रं दया[94] दानं दमः क्षमा ।
येषां[95] तेषां तप:[96] श्लाघ्यं शेषाणां कायशोषणम्[97] ॥ ३९ ॥

किं तपोभिः सकोपानां विप्लुतानां वनेन[98] किम्[99] ।
विभवैः किं सलोभानां दुर्वृत्तानां श्रुतेन किम् ॥ ४० ॥

एवं कलुषचित्तास्ते[100] तीव्रमन्युपरायणा:[101] ।
दुःसहा एव मुनयः प्रयान्तु विषयान्मम ॥ ४१ ॥

---

84 With B, °हिता AD. 85 With em. B, cf. T, स्वतविपक्ष AD. Editor notes स्वद्विपक्षा as the original text reading in B. 86 With B, °तश्च° AD. 87 With B, °शम्ये° AD. °वतिः D. 88 With B, °कान्तस्तप्त A, °करान्तस्तप्त D. 89 प illegible in A. 90 ख् illegible in D. 91 With B, मनस AD. 92 With B, °भुभिः AD. 93 भी° D. 94 दय् illegible in A. 95 यषां D. 96 With B, तप AD. 97 With B, °णां AD. 98 बलेन B only. 99 कि D. 100 With B, चित्तस्ते AD. 101 With B, °मन्यू° AD.

[16] A(39a). [17] °ना° D(40a). [18] B(133).

इत्युक्त्वा प्राहिणोत्तेभ्यः संदेशं पुरुषैर्नृपः[102] ।
यावती मद्वशा[103] भूमिस्तावती त्यज्यतामिति ॥ ४२ ॥

विहंगपक्षपातेन कुपितस्य महीपतेः ।
संदेशं मुनयः[19] श्रुत्वा विलक्षाः[104] समचिन्तयन् ॥ ४३ ॥

चतुःसमुद्रपरिखामेखलायाः क्षितेः पतिः ।
नरेन्द्रो ऽयं क्व गच्छामः को देशो[105] ऽस्य[106] वशे[107] न यः ॥ ४४ ॥

इति संचिन्त्य मुनयः पार्श्वं[108] कनकभूभृतः ।
सुरसिद्धसमाकीर्णं[109] जम्बूखण्डान्तिकं ययुः[110] ॥ ४५ ॥

[20]अथ तस्य महीभर्तुः प्रभावेण[111] महीयसा[112] ।
अभूदकृष्टपच्या[113] भूर्द्यौश्च[114] रत्नाम्बरप्रसूः ॥ ४६ ॥

[21]पाकशासनवैलक्ष्यकरणास्तस्य[115] शासनात् ।
सप्ताहं हेम ववृषुर्मेघाः संघातवर्षिणः[116] ॥ ४७ ॥

स प्रभावेण[117] महता[118] सह सैन्यैर्नभोगतिः ।
चक्रे[119] पूर्वविदेहाख्यं द्वीपं[120] दिव्यजनं[121] वशे ॥ ४८ ॥

---

102 With B, °नृप AD. 103 With B, °वसा AD. 104 With B, °क्षा AD. 105 With B, देशे AD. 106 With B, स्ये AD. 107 With B, वसे AD. 108 With B, पार्श्व AD. 109 With B, °सिद्धि° AD. 110 ययौ B only. 111 With B, °वेन AD. 112 With B, महीयस AD. 113 Em., cf. T, °सच्य AD, °शस्या B. 114 भूद्याश्च C. औ illegible in A. 115 वैलक्ष्य with s.a. B [Vol. I, p. x] and C, वैलक्ष° AD. णास्त with B, °णस्त° AD. 116 °पर्षि° A. 117 With B, वेन AD. 118 With B, महाता AD. 119 With B, चक्र AD. 120 With B, द्विपं AD. 121 °जनि D.

[19] मुन° A(39b) and D(40b). [20] B(135). [21] C(41).

बभूवुरग्रे सैन्यानि[122] स्फीतशौर्यबलौजसाम्[123] ।
भटानां व्योमगमने तस्याष्टादशकोटयः ॥ ४९ ॥

गोदानीयं ततो द्वीपमथोत्तरकुरूनपि[22] ।
पार्श्वानि स सुमेरोश्च शशासाहृतशासनः[124] ॥ ५० ॥

सुखं विहरतस्तस्य[125] मेरोः कनकसानुषु[126] ।
बहुशक्रो ययौ कालश्चतुर्द्वीपमहीपतेः[127] ॥ ५१ ॥

स कदाचित् सुरान् द्रष्टुं[128] व्योम्ना गच्छन् सुरोपमः[129] ।
चकार नीलजलदैर्व्याप्ता[130] इव गजैर्दिशः ॥ ५२ ॥

अथ तेषां निरस्तानां[131] मेरुपार्श्वे[132] तपस्यताम् ।
मुनीनामपतन् मूर्ध्नि तद्गजाश्वसकृद्दिवः[133] ॥ ५३ ॥

[23]ततस्ते क्रोधसंतप्तदृशा व्योमावलोकिनः ।
चक्रुः पिङ्गप्रभावल्लिकलापकपिला[134] दिशः ॥ ५४ ॥

[135]-किमेतत् कोप इत्युक्त्वा-[135] शापाग्निसिसृक्षया[136] ।
अभ्येत्य देवदूतस्तान् प्रहर्षाकुलितो ऽवदत् ॥ ५५ ॥

---

122 With B, सैन्य AD. 123 With B, °सौर्यबलोज° AD. 124 With B, सशा° AD. 125 With B, °रस्तस्तस्य AD. 126 With B, °पानुषु AD. 127 °चतुर्द्विप° A. 128 With B, द्रष्टं AD. 129 °वमः A. 130 With C, °जलदव्यास्त A, °जलदव्यस्ता B, °जलदव्याप्त D. 131 With B, °रस्था° AD. 132 °पार्श्व D. 133 With B, °पकृद्दि° AD, °शकृद्दि° C. 134 सिंग° A, शृङ्ग° B only. वल्लि with B, °पल्लि° AD, °वल्ली° C. 135 इत्युक्त्वा with em. B, इत्युक्तैः AD. कोपात्किमेतदित्युक्त्वा s. em. with C, m.c. 136 शापाग्निं विसिसृ° em. B, शापाग्निविसिसृ° C. *Pāda* b has one syllable missing.

[22] द्वी° D(41a). द्वीप° A(40a). [23] B(137).

एष निःशेषभूपालमौलिविश्रान्तशासनः[24] ।
पाकशासनतुल्यश्रीर्मान्धाता[137] पृथिवीपतिः ॥ ५६ ॥

नभसा नरदेवो ऽयं सह सैन्यैः[138] प्रसर्पति[139] ।
यस्य[140] कीर्तनधन्येयं वाणी पुण्याभिमानिनी ॥ ५७ ॥

न दृष्टो यस्य निर्दिष्टसर्वलोकसुखश्रियः[141] ।
[142-]मोहः संविन्मयस्येव[-142] विभव[प्रभवो][143] मदः ॥ ५८ ॥

कौबेरं धनदव्यक्त्या कौमारं[144] शक्तिमत्तया ।
ऐश्वरं वृषभयोगाद्वैष्णवं[145] श्रीसमागमात् ॥ ५९ ॥

प्रतापप्रसरात् सौरमैन्दवं जननन्दनात् ।
ऐन्द्रं दृप्तबलच्छेदाद्दिव्यं[146] रूपं बिभर्त्ययम् ॥ ६० ॥

बलिः प्रयातः[147] पातालं दधीचो ऽप्यस्थिशेषताम्[148] ।
अस्य त्यागेन जलधिः[149] क्षोभमद्यापि[150] नोज्झति[151] ॥ ६१ ॥

[25]श्रुत्वेति देवदूतस्य वचनं मुनिमध्यगः ।
ससर्ज दुर्मुखो नाम[26] मुनिः[27] शापजलं दिवि[152] ॥ ६२ ॥

---

137 With B, cf. T, °मान्वान्ता AD. 138 With B, सैन्यै AD. ऐ in °यै illegible in A. 139 With B, प्रसर्वति AD. 140 With B, यस्यां AD. 141 With B, निर्दृष्ट° AD. 142 With C, मोहसं° ABD. 143 Tentative reconstruction with C, cf. T, निभवि AD, विभवी B. 144 With B, कौवारं AD. 145 वृषसंयो° s.em. with C, m.c. 146 दृप्त with B, दृष्ट° AD. °च्छदा° C. 147 With B, प्रयाता AD. 148 स्यस्थि° A. 149 With em. B, cf. T, जनेब्धिः AD. Editor notes जलेब्धिः as the original text reading in B. 150 °द्यावि D. 151 With B, नोज्जुति AD. 152 With B, cf. T, दिनि AD.

[24] °मौलि° D(41b). °मौलिवि° A(40b). [25] B(139). [26] ना° A(41a). [27] मु° D(42a).

[28]प्रहसन्नथ तं प्राह[153] सेनानां[154] परिणायकः[155] ।
महर्षे संहर रुषं मा कृथास्तपसः[156] क्षयम् ॥ ६३ ॥

वैफल्यलज्जां[157] शापो[158] ऽयं यास्यत्यग्रे महीपतेः ।
[159]-न ते वयं-[159] खगा[160] येषां यूयं[161] पक्षक्षयक्षमाः[162] ॥ ६४ ॥

इत्युक्ते सैन्यपतिना शापस्तब्धामनीकिनीम् ।
दृष्ट्वाग्रे[163] विस्मयादूचे[164] किमेतदिति[165] भूपतिः ॥ ६५ ॥

संरब्धो[166] ऽथ समभ्येत्य सेनापतिरुवाच[167] तम् ।
तेषां देव महर्षीणां शापात्[168] सैन्यं न सर्पति[169] ॥ ६६ ॥

इदञ्च चक्ररत्नं ते व्योम्नि शापविघूर्णितम् ।
धत्ते[170] जलदसंरुद्धतिग्मदीधितितुल्यताम् ॥ ६७ ॥

एतदाकर्ण्य नृपतिर्दृष्ट्वा[171] चाग्रे तथैव तत् ।
दृशैव विदधे[29],[172] शापं[30] विफलोच्चण्डविप्लवम्[173] ॥ ६८ ॥

---

153 ब्राह् A. 154 With B, सेनानी AD. 155 With B, °नाय° AD. 156 With B, °थस्त° AD.
157 With B, °लजां AD. 158 शपो A. 159 नैते em. B. B notes न ते वथ as the original text reading in B. 160 With B, खग AD. B notes खगा as the original text reading in B. 161 With B, युयं AD. Editor notes यूयं as the original text reading in B. 162 With em. B, cf. T, पक्षयव्यमाः AD. 163 With B, दृष्टाग्रे AD. 164 With B, विन्ममादूचे A, पिन्ममादूचे D.
165 With B, किमि° AD. 166 With B, °रब्दो° AD. 167 With B, °वन AD. 168 With B, शापा AD. 169 With B, सर्वति AD. 170 With B, धेत्त AD. 171 With B, °दृष्टा AD. 172 ए illegible in D. 173 With B, °लोच्छ° AD.

[28] C(42). [29] विद° A(41b). [30] शा° D(42b).

देहक्षयं महर्षीणां परिरक्षन्[174] कृपाकुल:[175] ।
जटा[176] न्यपातयद्[177] भूमौ स लीलालसशासन:[178] ॥ ६६ ॥

[31]अजितक्रोधमोहानां[179] भारभूता वृथा वयम् ।
इतीव लज्जया तेषां लीना:[180] क्षितितले जटा:[181] ॥ ७० ॥

अथ मेरुशिर: प्राप्य नृप: सुरनिकेतनम् ।
पुरं सुदर्शनं[182] नाम ददर्श प्रियदर्शनम् ॥ ७१ ॥

नागास्तत्र कृतारक्षा: प्रख्यातोदकनिश्रिता:[183] ।
करोटपाणयो यक्षा: [184]-सुरा मालाधराभिधा:-[184] ॥ ७२ ॥

सदामत्तास्तथा[185] देवा: क्रोधोत्तम्भितसैनिका:[186] ।
चातुर्महाराजकायिकाख्यास्त्रिदशा[187] बलवत्तरा: ॥ ७३ ॥

महाराजाश्च चत्वार:[188] संनद्धकवचायुधा: ।
जित्वा राज्ञा[189] प्रभावेण[190] निजसेनाग्रगा:[32] [33]कृता: ॥ ७४ ॥

तत: कल्पद्रुमोदारकोविदारमनोहरम् ।
ददर्श पारियात्राख्यं[191] संश्रयं त्रिदिवौकसाम्[192] ॥ ७५ ॥

---

174 वरि° A. 175 With B, °कुला: AD. 176 Editor notes जट as the original text reading in B. 177 With em. B, °पतिय° AD. 178 With B, लिलालसशान: AD. 179 With B, °हनां AD. 180 With B, लीना AD. 181 With em. B, cf. T, जने: AD. 182 With B, सुदे° AD. 183 तोद with B, °तद° AD. °नि:सृता: C. 184 With C, cf. T, सुरमाला° ABD. 185 सदा म° B only. 186 With B, °त्तभि° AD. 187 महाराजका° em. B. Editor notes चातुर्राजका° as the original text reading in B. *Pāda* c has two syllables extra. 188 With B, त्वार: AD. 189 With B, राजा AD. 190 With B, °वेन AD. 191 पारिजाताख्यं B, °त्राख्य D. 192 With B, त्रिदोवोक° A, त्रिदोवोग° D.

[31] B(141). [32] °नाग्र° A(42a). [33] D(43a).

मेरोर्मूर्ध्नि[193] ततः शुभ्रप्रभां[194] मालामिवामलाम् ।
सुधर्माख्यां[195] सभां[196] प्राप स्वभासोद्भासिताम्बराम्[197] ॥ ७६ ॥

हेमविद्रुमवैडूर्यस्तम्भसंभारभास्वरः[198] ।
प्रासादो वैजयन्ताख्यः[199] प्रख्यातो यत्र राजते ॥ ७७ ॥

[34]यत्राब्जैर्वदनैर्भृङ्गैरलकैस्तुल्यतां[200] गताः ।
पद्मिन्यः सुरनारीणां[201] पद्मिनीनां सुराङ्गनाः[202] ॥ ७८ ॥

[35]बिम्बितैस्त्रिदशैर्यत्र[203] मणिभूस्तम्भभित्तिषु ।
सुरलोको बिभर्त्येको ऽप्यनेकसुरलोकताम् ॥ ७९ ॥

रत्नतोरणहम्र्यांशुनिवहैर्यत्र[204] चित्रिताः ।
व्याप्ता विभान्ति ककुभः शक्रायुधशतैरिव[36],[205] ॥ ८० ॥

यत्र [37]बालानिलालोलकल्पपादपपल्लवैः[206] ।
नृत्यद्धस्ता[207] इवाभान्ति[208] नन्दिन्यो नन्दनश्रियः ॥ ८१ ॥

यत्र चैत्ररथं नाम देवोद्यानं[209] मनोरमम् ।
धत्ते नित्योत्सवं[210] प्रेमिकामं[211] कामवसन्तयोः[212] ॥ ८२ ॥

---

193 •मूर्धी D. 194 With B, •प्रभं AD. 195 With B, •ख्या AD. 196 With B, सभा AD. 197 With C, cf. T, स्वप्रभावोद्भषितांबरां AD, प्रभावोद्भासिताम्बराम् em. B. Editor notes स्वभावोद्भासिताम्बराम् as the original text reading in B. 198 •वैदूर्य• B. 199 •यान्ता• B. 200 •भृंगैर• D. 201 With B, •नरी• AD. 202 With B, •रंग• AD. 203 With B, •तौस्त्रि• AD. 204 With B, •हम्र्यंशु• AD. 205 •रपि B only. 206 With B, •पपद• AD. 207 With B, नृत्तद्धन्ता AD. 208 With B, •भन्ति AD. 209 With B, •द्यान AD. 210 With B, •सव AD. 211 With B, •काम AD. 212 With B, •वंशतयोः AD.

[34] B(143). [35] C(43). [36] शक्रा• A(42b). [37] D(43b).

सर्वकामं सर्वसुखं सर्वर्तुकुसुमोज्ज्वलम् ।
सर्वातिशयितं[213] दृष्ट्वा देवानां सदनं नृपः ॥ ८३ ॥

मुहूर्तविस्मयास्पन्दसानन्दस्निग्धलोचनः[214] ।
अचिन्तयत् सुकृतिनामिमास्ताः[215] फलभूमयः ॥ ८४ ॥

ऐरावणं सुरपतेर्लोलालिवलयाकुलम्[216] ।
ददर्श तत्र सामोदं साकारमिव नन्दनम् ॥ ८५ ॥

[38]पुरंदरस्ततो[217] ज्ञात्वा प्राप्तं[218] भूमिपुरंदरम् ।
प्रत्युद्ययौ प्रमुदितः सह सर्वैर्मरुद्गणैः[39] ॥ ८६ ॥

[40]पूजितः सुरराजेन रत्नराजिविराजिताम्[219]।
राजराजः सभाभूमिं[220] भेजे विरजसां वरः ॥ ८७ ॥

त्रिदशेषूपविष्टेषु[221] रत्नपर्यङ्कपङ्क्तिषु ।
उपाविशन्नृपः[222] श्रीमानासनार्धे शतक्रतोः ॥ ८८ ॥

एकासनजुषोस्तत्र सुरेन्द्रमनुजेन्द्रयोः ।
रूपं[223] गुणगणोदारं निर्विशेषमदृश्यत ॥ ८९ ॥

---

213 With B, °शायितं AD. 214 With B, मूहूर्त्तविस्मयास्य° AD. 215 सुकृती° B only. 216 With B, सुराप° AD. 217 With B, पुरन्त° AD. 218 With B, प्रास्त AD. 219 With B, °राजवि° AD. 220 With B, °भूमि AD. 221 With B, तिदशेषु° A, त्रिदशेषु° D. 222 With B, °विश्र° AD. 223 With B, रूप AD.

[38] B(145). [39] °रुद्र° D(44a). [40] A(43a).

ततः सर्वसुरोत्सृष्टस्पष्टलोचनषट्पदैः[224] ।
पीयमानमुखाम्भोजं व्याजहार[225] हरिर्नृपम्[226] ॥ ९० ॥

अहो अभ्युदयः[227] श्लाघ्यस्तेजसा[228] तेजसां निधे ।
भवता भूषिता भूमिर्द्यौश्च देवेन[229] भास्वता[230] ॥ ९१ ॥

अभ्युन्नतप्रभावो ऽयं लसत्सितयशोंऽशुकः[231] ।
भ्राजते ते त्रिभुवने[232] साम्राज्यविजयध्वजः[41] ॥ ९२ ॥

[42]त्वत्कथामृतपानस्य त्वद्दर्शनरसस्य च ।
प्रेर्यते श्रोत्रनेत्रेण सुखाख्याने सरस्वती ॥ ९३ ॥

[43]स्थिरीकृतस्त्वयैवायि[233] सुकृताप्तविभूतिना ।
कर्मणां[234] फलवादस्य निश्चयश्छिन्नसंशयः[235] ॥ ९४ ॥

[44]अत एवेन्द्रियग्रामे चक्षुरेव स्पृहास्पदम्[236] ।
पुण्यैः पुण्योचिताचारा[237] दृश्यन्ते यद्भवद्विधाः[238] ॥ ९५ ॥

इत्युक्ते त्रिदशेन्द्रेण मान्धाता[239] यशसां निधिः ।
त्वत्प्रसादप्रभावो ऽयमित्युवाच[240] नताननः ॥ ९६ ॥

---

224 °षटपदैः B only. 225 With B, cf. T, भजहार AD. 226 With B, °रिनृ° AD. 227 Em., cf. T, पदोयः AD, पदोयं B, उदयः C. 228 °स्ते तेजसा B. 229 With B, देवन AD. 230 °स्वती D. 231 With em. B, °कं AD. 232 With B, °भूव° AD. 233 °यैवायं s.em. with cm. B, cf. T. 234 °णा A. 235 With B, °यश्च्छन्न° AD. 236 With B, °हस्प° AD. 237 With C, °यौचिताहार A, °योचिताचार B, °यौचिताचार D. 238 With B, °विधा AD. 239 With B, मान्वा° AD. 240 With B, यंवित्यु° AD.

[41] °विजय° D(44b). [42] A(43b). [43] B(147). [44] C(44).

इत्येवं पूज्यमानस्य तस्य नित्यादरैः सुरैः ।
षडिन्द्रः[241] प्रययौ[242] कालस्त्रिदिवे[243] वसतः सतः ॥ ९७ ॥

तत्पराक्रमविध्वस्तसमस्तासुरमण्डलः[244] ।
बभूव सुरराजस्य निरपायोदयो जयः ॥ ९८ ॥

दीप्तदानवसंग्रामे तस्य शौर्यमहातरोः[45],[245] ।
विश्रान्तिं[246] भेजिरे[247] देवा भुजच्छायोपजीविनः[248] ॥ ९९ ॥

तस्य पुण्यपणक्रीतं[249] भुञ्जानस्याक्षयं[250] सुखम् ।
कालप्रवाहे महति प्रययुः षट् पुरंदराः ॥ १०० ॥

सत्कर्मफलभोगस्य[251] लाञ्छनं[252] विमलं मनः ।
कालुष्याज्जायते[253] तस्य प्रत्यासन्नः[254] परिक्षयः ॥ १०१ ॥

[46]अथ कालेन कालुष्यकलितस्य मनोरथः ।
अभूल्लोभाभिभूतस्य भूपतेरभिमानिनः ॥ १०२ ॥

त्रिदशानामियं लक्ष्मीर्मद्बाहुबलपालिता[255] ।
तदिमां[256] न सहे तावदर्धासनविडम्बनाम् ॥ १०३ ॥

---

241 With B, °द्र AD. 242 With B, प्रययो AD, प्रणयौ C. 243 With B, कालं त्रिदिवे A, कालं त्रिदिपे D. 244 With C, cf. T, °विश्वस्तसमप्ता° AD, °विश्वस्तसमस्त° B. 245 With B, सौर्य° AD. 246 With B, °श्रान्तौ AD. 247 With B, भाजिरे A, भाजिर D. 248 भुजच्छा with B, भूजाच्छ° AD. जीविनः with C, cf. T, °जीविवद AD, °जीविवत् B. 249 With B, m.c., °पणकृतं AD. 250 With B, cf. T, °क्षमं AD. 251 ग illegible in A. 252 With B, लांच्छ° AD. 253 With B, °जयते° AD. 254 With B, °सन्न AD. 255 With B, °बाहू° AD. 256 With B, तदे° AD.

[45] °महा° A(44a). °महात° D(45a). [46] B(149).

अहमेकः [257]-सुरपतिः प्रभावान्न-[257] भवामि किम्[258]।
अयं मम भुजः[259] सर्वजगद्भारभरक्षमः[260] ॥ १०४ ॥

च्यावयित्वा सुराधीशं[261] स्वर्गसाम्राज्यसंपदम् ।
[47]एकातपत्रतिलकां स्वयंग्राहोचितां भजे ॥ १०५ ॥

इति चिन्तयतस्तस्य शक्रद्रोहाभिलाषिणः ।
शुभ्रप्रभा प्रभावश्रीर्मलिव म्लानतां ययौ ॥ १०६ ॥

घनोदयसमुत्सिक्ता[262] सौजन्यतटपातिनी ।
लोलं कलुषयत्येव मानसं श्रीतरङ्गिणी[263] ॥ १०७ ॥

प्रमादो[264] विपदां दूतो[265] दुःसहो[266] महतामपि ।
कुशलोन्मूलनायैव[267] किल्बिषाकुलिता मतिः ॥ १०८ ॥

पापसंकल्पमात्रेण[268] क्षितौ क्षितिपतिः[269] क्षणात् ।
[270]-पपात विभ्रष्टफलश्छिन्नमूल-[270] इव द्रुमः ॥ १०९ ॥

[48]हन्ति विद्यामनभ्यासः[271] श्रियं हन्ति मदोदयः ।
विद्वेषः[272] साधुतां हन्ति हन्ति लोभः[273] समुन्नतिम्[274] ॥ ११० ॥

---

257 With C, cf. T, सुरपतिः प्रभावानु AD, सुरपतिप्रभावो ऽनु B. 258 With C, cf. T, कं ABD. 259 With B, भूजः AD. 260 With B, °भरभ° AD. 261 °धिशं D. 262 With B, घनेदयसमुत्पक्ता A, घनोदयसमुत्पक्ता D. 263 With B, श्रीरंगि° AD. 264 With C, प्रमदा ABD. 265 With C, दूती AD, दूतिः B. 266 With C, °सह AD, सहा B. 267 With B, °यैच AD. 268 ए illegible in A. 269 With B, °पति AD. 270 पपात with C, पापत AD, पपाता° B. विभ्रष्ट em., cf. T, विश्रांभ° AD, [पपाता]विश्रम्भ° B, विस्त्रस्त° C. फलश्छि with C, °फलश्च्छ° ABD. 271 विव्या° D. 272 With B, °द्विषः AD. 273 With B, लोभ AD. 274 With B, °नितिं AD.

[47] A(44b); D(45b). [48] B(151).

[49]अहो बत[275] महोत्कर्षशृङ्गारोहो[276] महोदयः ।
विभवोद्भ्रवमत्तानां[50] सहसैव[51],[277] पतत्यधः ॥ ११ ॥

तेन सर्वविभूर्नाम[278] पूजितः पूर्वजन्मनि ।
तत्फलादाप्तवान्[279] राज्यं स्पृहणीयं[280] मरुत्पतेः ॥ १२ ॥

सुराधिपाधिकः[281] को ऽपि[282] प्रभावो विस्मयावहः ।
अनल्प[भाग]स्तस्याभूत्[283] पात्रदानांशसंभवः ॥ १३ ॥

बन्धुमत्यभिधानायां नगर्यामुषितः[284] शुचिः[285] ।
वणिगुत्करिको[286] नाम सो ऽभवत् पूर्वजन्मनि ॥ १४ ॥

विपश्यी नाम भिक्षायै[287] सम्यक्संबुद्धतां गतः ।
विवेश तद्गृहं सर्वसत्त्वसंतारणोद्यतः[288] ॥ १५ ॥

पात्रे तस्य स[289] चिक्षेप[290] मुद्गमुष्टिं प्रसन्नधीः[291] ।
फलानि तत्र चत्वारि पेतुः शेषाणि[292] भूतले ॥ १६ ॥

तेन दानप्रभावेण[293] मान्धाता पृथिवीपतिः ।
सर्वद्वीपपतिर्भूत्वा[294] शक्रार्धासनमाप्तवान् ॥ १७ ॥

---

275 बते D. 276 With B, °श्रिंगा° AD. 277 With B, पह AD. 278 °भुर्ना° C. 279 With B, °लदाप्तवन AD. 280 With C, °हणी AD, °हनीयं B. 281 With B, °धिपः AD. 282 °पे D.
283 Tentative reconstruction on the basis of T. अनल्पस्तस्याभूत AD, अनल्पपिण्डस्तस्याभूत् B.
284 With B, °चितः AD. 285 श्रुचिः A. 286 With B, वनि° AD. 287 With B, °क्षयै AD.
288 With B, °द्यातः AD. 289 च C. 290 With em. B, निक्षेप AD. Editor notes नंक्षेव as the original text reading in B. 291 With B, °नद्धीः AD. 292 With B, °षाणे AD. 293 With B, °वेन AD. 294 With B, °तिभूत्वा AD.

[49] C(45). [50] विभ° D(46a). [51] स° A(45a).

[52]मुद्गशेषश्च्युतो[53],[295] यस्माद् भूमौ[296] तस्यान्यचेतसः ।
तदसौ[297] फलपर्यन्ते पतितस्त्रिदशालयात्[298] ॥ ११८ ॥

लुठति विकलकल्पा यत्र संकल्पमाला[299]
स्फुरति न च कदाचित् स्वप्नमायान्तरे[300] या ।
भवति विभवभोगाभोगिनी भाग्यभाजाम्
अतुलफलतति:[301] सा दानकल्पद्रुमाणाम्[302] ॥ ११९ ॥

इत्याह भगवान् बुद्ध:[303] प्रीत्या[304] [305]-दानफलं श्रियम्-[305]।
निजजन्मान्तराख्यानैर्भिक्षूणामनुशासने[306] ॥ १२० ॥

इति क्षेमेन्द्रविरचितायां[307] बोधिसत्त्वावदानकल्पलतायां[308] मान्धात्रवदानं[309]
चतुर्थ:[310] पल्लव: ॥

---

295 With B, °षच्युतो AD. 296 भूतौ C. 297 With B, तदासौ AD. 298 With B, cf. T, पतिस्तृद° AD. 299 With B, °माली AD. 300 स्वस्न° A. 301 अतुलप° D. 302 With em. B, °कल्पद्रुम: AD. 303 With B, बुद्ध AD. 304 With C, प्रीत्य AD, प्रेत्य B. 305 °फलश्रि° B. 306 °याने भिक्षू° B. 307 With B, °चित्तायं AD. 308 °कल्वल° D. 309 With B, °धतुरव° AD. 310 नाम चतुर्थ: B.

[52] B(153); D(46b). [53] मुद्र° A(45b).

[1][५. चन्द्रप्रभावदानम्][1]

दुग्धाब्धिर्विबुधार्थनातिविधुर:[2] क्षुब्धश्चकम्पे[3] चिरं
कम्पन्ते[2] च निसर्गत:[3] किल फलोत्सर्गेषु[4] कल्पद्रुमा:[5] ।
एक: को ऽपि स जायते तनुशतैरभ्यस्तदानस्थिरि
निष्कम्प:[6] पुलकोत्करं वहति य: कायं प्रदानेष्वपि[7] ॥ १ ॥

अस्ति कैलासहासिन्यामुत्तरस्यामनुत्तरा[8] ।
दिशि भद्रशिला नाम भुवनाभरणं पुरी ॥ २ ॥

यस्यां सितयश:पुष्पा:[9] सफला: सर्वसंपद:[10] ।
दानोद्यानलता: प्रीत्यै बभूवु:[11] पुरवासिनाम् ॥ ३ ॥

यत्र त्रिपुरजिन्नेत्रशिखित्रस्तो मनोभव:।
अबलाभिश्चलक्रीडाभ्रूभङ्गैरेव[12] रक्ष्यते[13] ॥ ४ ॥

[4]मुक्ताजालोज्ज्वला[14] यत्र भाति हेमगृहावली[15] ।
मेरो: शिखरमालेव[16] विस्फुरत्स्फीततारका[17] ॥ ५ ॥

---

1 B starts पञ्चम: पल्ल्व: । चन्द्रप्रभावदानम् । C starts ५ चन्द्रप्रभावदानम् । 2 With B, °धुरा: AD. 3 With B, °कांपे AD. 4 With B, कलो° AD. 5 द्र् illegible in A. 6 With B, °कम्बा AD. 7 °नेष्वपि D. 8 कैलास with C, कैलाश° ABD. हासि with B, °हसि° AD. 9 With B, °पुष्प: AD. 10 °पम्पद: A. 11 With B, °भूवु AD. 12 भिश्च with B, °भिच° AD. °क्रीडभ्रू° B. °भूभंगै° A. 13 With B, रक्षेत AD. 14 With B, मुक्तजा° AD. 15 With B, °गृहिव° AD. 16 With B, cf. T, शिशर° AD. 17 With B, °स्फिततारका: A, °स्पिततारका: D

[1] B(155): C(46). [2] कम्पन्° A(46a). [3] निसर्ग° D(47a). [4] B(157).

तस्यां चद्रप्रभ:[5],18 श्रीमानभूद्[6],19 भूमिभृतां वर: ।
कैलास[20] इव य: कान्त्या चकार दिनचन्द्रिकाम् ॥ ६ ॥

यस्य देहप्रभापूरै: पूर्णेन्दुद्युतिहारिभि: ।
निशास्वदीपकाभासु[21] नाभूत् स्नेहगुणक्षय: ॥ ७ ॥

स्मरज्वरं भजन्ते ऽस्य दर्शनेनैव तारका: ।
इति [22]-च्छत्रच्छलादस्य च्छादितं-[22] खमिवेन्दुना[23] ॥ ८ ॥

प्रदिशत्येष सततं श्रियं सत्कोशसंश्रयाम्[24] ।
[25]-इतीव दर्शने यस्य-[25] संकोचं[26] प्राप पद्मिनी ॥ ९ ॥

तेनाहंकारमुत्सृज्य[27] त्यागशुभ्रश्रिया श्रिय: ।
निर्दिष्टाश्छत्रमुकुटप्रकटा:[28] पुरवासिनाम्[29]॥ १० ॥

शुशुभे विभवस्तस्य पुण्यालंकृतोन्नते:[30] ।
आरोहति परां कोटीं[31] नम्रस्य धनुषो गुण: ॥ ११ ॥

चत्वारिंशत्सहस्राणि[7] वत्सराणां[32] शतानि च ।
बभूव देहिनामायुस्तस्य काले कलिद्विष: ॥ १२ ॥

---

18 With B, चन्द्र: प्रभा AD. 19 श्रीमन° A. 20 कैलाश B only. 21 Em., cf. T, नि:शासु दीप° AD, निशासु दीप° B. 22 लाद with B, °लद° AD. च्छादि with B, च्छदि° AD. दस्माच्छा s.em.
23 °वन्दु° A. 24 With B, cf. T, मत्कोशसयां A, मत्कोशसंयां D. 25 Em., cf. T, इती शदर्शने स्य AD, इति तद्दर्शनेनैव B. 26 With B, °कोच AD. 27 Em., सेनाहं° ABD. 28 With B, °प्रकट: AD.
29 सुरव° A. 30 °करणोन्नते: B. *Pāda* b has one syllable missing. 31 With B, कोटां AD.
32 °राणा A.

[5] °चन्द्र° A(46b). [6] श्री° D(47b). [7] चत्वा° A(47a). °शत्स° D(48a).

[8]तस्य षष्टिसहस्राणि[33] पुरिणां पूर्णसंपदाम् ।
बभूवुर्लोकपालस्य लोकपालाधिकश्रियः ॥ १३ ॥

यज्वनः[34] कीर्तितिलकास्तस्य[35] पुण्यविभूषणाः।
यज्ञधूमलताभङ्गैर्बभुर्लोलालकाः[36] श्रियः ॥ १४ ॥

[9]तस्य[37] संपत्कुमुदिनीविकासनसदोदितः[38] ।
अभून् [मन्त्री][39] महाचन्द्रश्चन्द्रलोक[40] इवोज्ज्वलः ॥ १५ ॥

येन निश्चललक्ष्येण[41] प्रभोः प्रज्ञापताकया ।
राज्याब्धिकर्णधारेण पारमुत्तारितं[42] यशः ॥ १६ ॥

महीधराभिधश्चापि[43] बभूवामात्यकुञ्जरः ।
भूमिभारसहस्तस्य दिङ्नाग[44] इव पञ्चमः ॥ १७ ॥

[10]मन्त्रेणाभिन्नमन्त्रस्य[11],[45] यस्य नीतिबृहस्पतेः ।
त्याजिताः प्रतिसामन्ताः शौर्यं[46] विषमिवाहयः[47] ॥ १८ ॥

तेनामात्येन[48] स नृपः स च राज्ञा[49] विभूषितः ।
गुणः सत्पुरुषेणेव गुणेनेव[50] च सज्जनः ॥ १९ ॥

---

33 With B, °सहास्रा° AD. 34 Em., यज्ञनः AD, यज्वानः B. 35 °कस्तस्य D. 36 With B, °भगर्बभूर्लीला° A, °भंगर्बभूर्लील° D. 37 With B, तस्या AD. 38 °कासेन सदो° B. 39 Tentative reconstruction with B, cf. T. 40 °चन्द्रालोक s.em., cf. T. 41 With C, °लक्षेण ABD.
42 °मुत्तरितं B. 43 Em., cf. T, °श्चास्य AD, °श्चासौ B. 44 With B, cf. T, दिद्नाग AD, दिङ्नाग C. 45 मन्त्रणा° B. 46 With B, सौद्यं A, सोद्यं D. 47 With B, °वाह्यिः AD. 48 With B, °मात्यन AD. 49 राज D. 50 With B, °नैव AD.

[8] B(159). [9] C(47). [10] A(47b). [11] मन्त्रेणा° D(48b).

कृतज्ञ:[51] सरल: स्वामी सद्भृत्यो भक्तिनिर्भर: ।
सुकृतप्रभवेणैव[52] भाग्ययोगेन लभ्यते ॥ २० ॥

[12]इयमेव चिरभ्रान्तिविश्रान्ति: सर्वसंपदाम्[53] ।
यद् गुणज्ञतया वेत्ति [54-]स्वामी सत्पुरुषान्तरम्[-54]॥ २१ ॥

तौ कदाचिद्ददृशतु: स्वप्नमन्ये[55] च मन्त्रिण: ।
क्षयो यस्य फलं [56-]दाने व्यसनेन[-56] महीपते: ॥ २२ ॥

तौ दृष्ट्वा दुर्निमित्तानि प्रादुर्भूतानि शङ्कितौ ।
व्यग्रौ बभूवतुर्नित्यं शान्तिस्वस्तिककर्मसु ॥ २३ ॥

निमित्तदर्शनोद्विग्नास्तपोवनगता[13] अपि ।
विश्वामित्रप्रभृतय: स्वामीत्यूचुर्महर्षय:[57] ॥ २४ ॥

अत्रान्तरे ब्रह्मबन्धु: प्राग्जन्मब्रह्मराक्षस: ।
रौद्राक्षो नाम मात्सर्यक्रौर्यदौर्जन्यदु:सह: ॥ २५ ॥

श्रुत्वा दानोद्भवां[58] कीर्तिं राज्ञ: सर्वगुणोज्ज्वलाम् ।
निर्गुण: सर्वगुणद्वेषी[59] संतप्त: समचिन्तयत् ॥ २६ ॥

